# अध्याय – १

# ।। वास्तुशास्त्रेतिहासः ।।

# अध्याय – १

## ।। प्राक्कथनम् ।।

भारतीयस्थापत्यविद्यायाः परम्परा अतीव प्राचीना अस्ति। यद्यपि भारतीयपुरातनपरम्परायां विद्यानामुल्लेखः अस्ति, तत्र स्थापत्यविद्यायाः उल्लेखः न मिलति। अस्य अभिप्राय एतादृशं कदापि नास्ति यद् भारतीयविद्यायां स्थापत्यविद्यायाः स्थानं महत्त्वं नास्ति इति। वस्तुतः अस्याः विद्यायाः सम्बन्धः शालीयजीवनेन सह अस्ति। यस्या आवश्यकता मानवेन एवं मानवसभ्यतया सह सनातनकालेन अस्ति। कतिपयविद्वांसः स्थापत्यवेदरूपेण अथर्ववेदस्य उपवेदः इति स्वीकुर्वन्ति। यद्यपि वेदेषु स्थापत्यविद्यायाः चिन्तनसम्बन्धिबीजं निहितमस्ति, परन्तु अस्य अधिकं परिष्कृतरूपं शूल्वसूत्रेषु दृष्टिगोचरं भवति। भारतीयस्थापत्यविद्यायाः परम्परायां स्पष्टरूपेण प्रवर्तकौ द्वौ स्तः। तत्र प्रथमं विश्वकर्मा, द्वितीयो मयः। अस्माकं भारतदेशस्य देवभूमिः अर्थात् उत्तरापथभूभागस्योपरि देवशिल्पस्य विकासः जातः। एवमस्य क्षेत्रस्य वास्तु परम्परायां विश्वकर्मा प्रथमः वास्तुप्रवर्तकाचार्यः संजातः। कालान्तरेषु अनेकैः कलाकुशलैः विश्वकर्मणः नाम्ना सह स्वस्वस्य नाम प्रसिद्धं कृतम्। अनेन प्रकारेण दक्षिणभारते वास्तुपरम्परायाः शिल्पि मयः आसीत्। यस्य कलायाः एवं विज्ञानस्य च भूरि–भूरि प्रसंशा पुराणेषु महाकाव्येषु च दृश्यते। अस्माकं देशे स्थापत्यशास्त्रस्य परिधिः अत्यन्त विशाला अस्ति। तत्र तासु परिधिषु नगररचना, भवनस्य, मन्दिरस्य, मूर्तीनां रचना, चित्रकला सर्वमागच्छति। प्राचीनभारतीयसंस्कृतेः प्रसिद्धिः यज्ञीयसंस्कृतिः अस्ति। तथापि तत्र ग्राम्यसंस्कृतिः,

अरण्यसंस्कृतिः अपि भागं भजति। अस्मिन् भारतदेशे सभ्यतायाः सुविकसितावस्थायां प्रवृत्तेः निवृत्तिकारणेन अरण्यजीवनस्य महत्ता सदैव संरक्षितमस्ति। मोक्ष प्राप्तयर्थम् अरण्यस्य शरणं सदैव उपादेयमस्ति।

अनेन साकं जीवनस्य विभिन्नानामावश्यकतानां पूर्तिर्दृष्ट्या ग्राम्यजीवनस्य गरिमा अपि सततमक्षुण्णं भवति। ग्राम्यपरिवेशेषु आध्यात्मिकतायाः एवं धार्मिकयोपचेतनायाः तथा प्रेरणायाः विशेषदर्शनं भवति। वैदिकजीवनं ग्राम्यमासीत्। वैदिकजीवनं ग्राम्यं तु आसीत् एव नागरिकमपि आसीत्। ग्रामीणाः स्वकीयं खाद्यान्नं नगराय समर्पितं कुर्वन्ति। अनेन विनिमयेन औद्योगिकमेवं व्यवसायिकमुत्पादनं नगरात् भवति। अनेन प्रकारेण अस्माकं देशे परस्परः द्वयोर्सम्बन्धः चिरकालादेव अस्ति। वास्तुशास्त्रीयदृष्टिकोणेन ग्रामस्य तथा नगरस्य वा विभेदः परिमाणमात्रमस्ति। लघु–लघु ग्रामाः अपि कालान्तरेषु वाणिज्यं, व्यवसायः शिक्षासंस्थानमथवा तीर्थस्थानानदीभिः विभिन्नकारणैः विशालनगरेषु परिणताः जाता।

प्राचीनभारतीयनगराणामथवा पुराणां विकासः तेषां प्रेरकानां तत्त्वदृष्ट्या भागद्वये विभाजितमस्ति। प्रथमो वर्गः नगरसम्मिलितं यस्य विकासः अनियोजितमेवं नैसर्गिकरूपेण जातः। अनेन प्रकारेण नगरस्तु वस्तुतः स्वशैशवावस्थायां ग्रामे एव आसीत्। पुरनिवेशः वा नगरनिवेशः भारतीय वास्तुशास्त्रस्य एकं प्रमुखमङ्गमस्ति। एकमपि भवनं यस्य कस्यापि ग्रामस्य वा नगरस्य वा पुरस्य एकमङ्गमस्ति। अतः ग्रामनिवेशस्य वा नगरनिवेशस्य सम्यक् ज्ञानं विना तथा तस्य पृष्ठभूमिज्ञानं विना गृहनिर्माणं वा भवननिवेशस्य कार्ये समरूपतायाः कल्पना अपि न भवति। एवं तत्र सौन्दर्यस्य भावना अपि साकारं न भवति। अत एव तत्र स्थापत्यकलायाः

वास्तुशास्त्रस्य आवश्यकता भवति। तत्र नगरेषु मार्गनिर्माणं, जलप्रदानव्यवस्था, सार्वजनिकसुविधा हेतु आरामोद्यानानि, पुस्तकालयानि, शैक्षणिकभवनानि, आपण–न्यायशालदि, स्नानागारादीनां निर्माणं भवनानामाकार:, प्रकार:, दिशा, मानं–प्रमाणम्–उन्मानं, भूमे: प्राकर:, निर्माणकार्ये उपयोगिवस्तूनां प्रकृति: इत्यादीनां विस्तरेण आवश्यकता भवति। जलप्रदानव्यवस्थायां सेतुबन्धनं, वापी, कूप:, सरांसि नदी इत्यादीनां विचार: अत्र भवति। यस्य कस्यापि निर्माणहेतु: विस्तारेण शिल्पशास्त्रे विचार: भवति। सहस्त्रवर्षेभ्य: प्राक् मनिषिण: यस्य कस्यापि निर्माणे सूक्ष्मातिसूक्ष्मं विचारं कृतवन्त:। तद् उदाहरणमपि दृग्गोचरं भवति। शिल्पकार्यार्थं मृत्तिका, इष्टिका, सुधा, पाषाणं, काष्ठं, धातुं तथा रत्नादीनामुपयोग: भवति। एतेषां प्रयोगसमये प्रत्येकस्य वस्तुन: समीचीनरीत्या परीक्षणं कृत्वा एषां निर्माणे आवश्यकतानुसारमुपयोग: करणीय:। परीक्षणहेतु मानं कियत् वैज्ञानिकमासीत् तस्य कल्पना निम्नदर्शितोदाहरेण मिलति । यथा महर्षिभृगु: कथयति यत् –निर्माण उपयोगिन: प्रत्येक वस्तुन: परीक्षणं निम्नमापदण्डेन करणीयं भवति –

**वर्ण लिङ्ग वयोऽवस्था: परोक्ष्यं च बलाबलम्।**

**यथायोग्यं यथाशक्ति संस्कारान्कारयेत् सुधी:।।**[१]

अर्थात् वस्तो: वर्ण:, लिङ्गं, आयु:, अवस्था इत्यादीनां यथायोग्यं वस्तुमध्ये बलाबलं भवति। तद् दृष्ट्वा यथोचितरूपेण संस्कारा: करणीया। वास्तुशास्त्रस्य उद्भवमानवस्य जगति अवतरेण सह जातं स्यात् कदाचित्। पाषाणयुगस्य मानवेन स्वनिवासाय गह्वरादीनां

[1] भृगुसंहिता

चयनं कृतम्। तत्र तु गह्वरनिर्माणे स्वकीयरचनाकौशलं सम्मिलितं कृतं स्यात्। कालावधौ निर्मित राजप्रासादः, देवप्रासादः, दुर्गादिः एवं तेषु उत्कीर्णः कलात्मकचित्रं विकासोन्मुखं विकसितस्य निर्माणस्य भविष्यस्य सङ्केतं करोति। वास्तुशास्त्रम् अस्माकं प्राचीनानाम् ऋषीणां निर्माण सम्बन्धितं ज्ञानस्य संवाहकमस्ति। अस्य विषयकचर्चा ऋग्वेदात् प्राप्यते। ब्राह्मणग्रन्थेषु सूत्रसाहित्येषु यान्त्रिकी विषयस्योपरि समुचितं चिन्तनं जातम्। अनेन प्रकारेण वास्तुशास्त्रं वैदिकसाहित्यस्य उष्मा अस्ति। अस्मिन् विषयस्योपरि विश्वकर्मणः, आचार्यमानस्य, मयस्य, नारदस्य, नन्दीशस्य, श्रीकुमारादीनां वास्तुप्रवर्तकाचार्याणां रचना एकतः विश्वस्य महत्तायाः एवमुपयोगितायाः व्याख्यां करोति।

सृष्टिर्भूगोलं सौरमण्डलं चेदं सर्वं वास्तुशास्त्रे समन्वितम्। वास्तोः सर्वव्यापकं विज्ञानं वर्तते। अत एव ज्योतिषशास्त्रस्य, भूगर्भविद्यायाः भूगोलस्य एवं एतादृशानामन्यानां शास्त्राणां समावेशोऽस्मिन् वास्तुशास्त्रे कृतो वर्तते। वस्तुतस्त्वस्य वास्तुशास्त्रस्य सर्वतो व्यापकदृष्टिकोणो वर्तते। यथास्य शास्त्रस्य सामाजिकरीत्या एवं सर्वजनहिताय, सर्वजनसुखायाप्युपयोगो मन्यते। मनुष्याणां सहचराः पशवः वनस्पतयश्च सदैव मन्यन्ते। तैर्विना मानवजीवनमसम्भावि। प्राचीनकालादारभ्य धेनवः वृषभाः अश्वाः गजाः इत्यादयः पशवो मनुष्याणां कृते उपयोगिनः सन्ति। अनेन प्रकारेण यस्मिन् भूप्रदेशे वनस्पतीनां विकासो भवेत्। घनावृक्षाः क्षुपा इत्यादयः स्युः, जलप्रपातः स्यात्, लतापत्रतृणादिकं यत्र स्यात् एतादृशे भूप्रदेशे यदि नगरनिर्माणं कृत्वा मनुष्यः वसेत् तदा तत्र मानवजीवनस्य सम्पूर्णो विकासो

भवितुमर्हति। अनेनैव प्रकारेण नगरोचित – पुरोचित – ग्रामोचित – प्रदेशानां नगरनिर्माणाय परिग्रहः कर्तव्यः। यत्र जलसंग्रहः तडागादिकमधिकं स्यात् अथवा नदीतटं स्यात् तत्र कृषिकार्यं, पुष्पफलादीनामत्याधिकमात्रायामुत्पादनं कर्तुं शक्यम्। अत एवैतादृशः प्रदेशः नगरनिर्माणाय श्रेष्ठः इति मत्वा तत्र नगरनिर्माणं कुर्यात्।

अत्र नगरग्रामादिरचनानां देवमनुष्यराजप्रासादनां निर्माणस्यापि विचारोऽत्र क्रियते।

# ।। वास्तुशास्त्रेतिहासः ।।

कस्याऽपि देशस्य प्राचीनस्थापत्यैः तथा साहित्यद्वारैव तस्य देशस्य सांस्कृतिकं मूल्यं ज्ञायते। विद्याः कलाश्च देशस्यामूल्यं धनमस्ति। शिल्पस्थापत्यं मानवजीवनस्य अतीवोपयोगि एवं महत्त्वपूर्णमङ्गमस्ति।

वास्तुशास्त्रं प्राचीनतमं शास्त्रं वर्तते। भारतीय वास्तुकला प्राचीनतमा महत्त्वपूर्णा अस्ति। अस्माकं देशे युग–युगान्तर पूर्वं बृहद्नगराणां, दुर्गाणां, राजप्रासादानां तथा सेतूनां निर्माणं जातम्, सर्वमपि प्रवर्तमानयुगेऽपि सुरक्षितं दृश्यते। सैन्धव सभ्यतासम्बन्धितावशेषानां कालनिर्धारणं पुरातत्त्व–विद्वज्जनाः प्रायः ५५०० वर्षाणि पूर्वं मन्यन्ते, इति भारतीयस्थापत्यकलायाः विकासप्रमाणमस्ति। वास्तु वा स्थापत्यस्य अस्माकं भारतवर्षे अधिकतम विकासः जातः तस्मात् कारणात् एतद्विषयकविस्तृत लेखनस्य आवश्यकता जाता, तदा एतद्विषयकस्य अनेकग्रन्थानां रचना जाता। तस्मात् केषाञ्चित् ग्रन्थानां रचना–कालः निश्चितं ज्ञातमस्ति, परन्तु केचन ग्रन्थाः अनुपलब्धाः सन्ति तथा तस्य रचना–कालः अपि निश्चितः नास्ति। भारतीय शिल्पस्थापत्यस्य(वास्तुविद्यायाः) प्रारम्भः कदा जातः इति निर्णयः प्राचीनसाहित्याधारेण कर्तुं शक्यते।

प्राचीनकालादाराभ्य द्यावधि वास्तुविद्यायाः प्रसिद्धाः,चत्वारो वेदाः प्रसिद्धाः। यथा– ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। एतेषां क्रमेण आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, स्थापत्यवेदश्चेति चत्वार उपवेदाः सन्ति। वास्तुशास्त्रस्य मूलं

तु अथर्ववेदे प्राप्यते। कालान्तरे तेषां विकासो भूत्वा स्थपत्यवेदस्य प्रसिद्धिः संजाता। एवं तत्र वास्तुकलायाः विकासोऽभवत्। अयं स्थापत्यवेदो वास्तुकलायां नगरनिर्माणे भवननिर्माणे च श्रेष्ठो मार्गदर्शकः। अनेनेदं फलितं भवति यदियं वास्तुविद्या अतिवप्राचीना वेदकालीना चास्ति। तथा चेयं वास्तुकला स्थापत्यविज्ञानस्यैकं महत्त्वपूर्णमङ्गम्। अष्टप्रकारकं चिकित्साविज्ञानं, सप्तप्रकारयुक्तो धनुर्वेदः, ज्योतिषं चतुर्थं विज्ञानम्। एतानि चत्वारि पारिभाषिक-शास्त्राणि (विज्ञानानि) ब्रह्मणा निर्मितानि।

वेदाः, ब्राह्मणग्रन्थाः, रामायणम्, महाभारतम्, पुराणानि, जैनागमाः, बौद्धग्रन्थाः- इत्यादिषु प्रमाणभूतेषु ग्रन्थेषु वास्तुविद्यायाः वर्णनं प्राप्यते। ऋग्वेदे वास्तोष्पतेः स्तुतिर्दृश्यते। पाषाणनिर्मितानि १०० नगराणां सप्रमाणं भवनरचनाया समुल्लेखो दृश्यते। अथर्ववेदस्य सूक्तेषु स्थापत्यकला- गुहनिर्माणस्य नियमाः दृश्यन्ते। गृह्यसूत्रेऽपि गृहारम्भस्य धार्मिकक्रियायाश्च तत्त्वानि वर्तन्ते। आश्वलायन–गोभिलादिगृह्यसूत्रेषु भूमिपरीक्षादिरूपं वर्णनं विद्यते। बौधायनजैमिनीयपारस्करभारद्वाजादि गृह्यसूत्रेषु वास्तुविद्या वर्णितं दरीदृश्यते।

शुक्राचार्यमतानुसारं मुख्या विद्याः ३२ तथा कलाः ६४ मन्यन्ते। यत् कार्यं वाणीद्वारा वा शब्दद्वारा कर्तुं शक्यते, तत् कार्यं विद्या तथा यत् कार्यं वाणीद्वारा वा शब्दस्य उपयोगं कृत्वा न भवति, किन्तु मनुष्यो मौनः (हस्तद्वारा) सङ्केतद्वारा कर्तुं शक्नोति, तत् कार्यं कला-इति ज्ञायते। शिल्पं- चित्रम्- इत्यादिकाः कलाः मौनावस्थायां कर्तुं शक्यते, अतः एतत् सर्वं कलाः इति कथ्यन्ते।

## १. वास्तुशब्दस्य व्याख्या-

वास्तोः शास्त्रं वास्तुशास्त्रम्। वस्तुं योग्यं तद् वास्तु। तस्य शास्त्रमिदम् । वस् धातोः वास्तु शब्दो निष्पन्नः, तस्य अर्थः निवासः। **वसन्ति प्राणिनो यत्र** अर्थात् प्राणिनः यत्र वसन्ति इति वास्तु।[१]

जलचरः जले वसन्ति एतेषां वास्तु, जलम्, खगानां नीडमेव तेषां वास्तु। किन्तु अमरकोषे गृहस्य नियता भूमिः एव वास्तु- 'वेश्मभूर्वास्तुस्त्रियाम्' इति दृश्यते।[२], शब्दार्थभानु,(पृ-२८७), पद्मचन्द्रकोश,(पृ-३४८) शब्दस्तोममहानिधि (पृ-१०२३) तथा शब्दार्थ चिन्तामणिकोषः (पृ-२९५) इत्यादि कोश-ग्रन्थेषु वास्तु शब्दस्यार्थः 'वास-योग्या भूमिः' वा 'गृह-करण-योग्या भूमिः' इति दर्शितमस्ति। वस्तुतः निवास-योग्या भूः एव वास्तु इति गृहीतमस्ति। ऋग्वेदे वास्तु शब्दस्य प्रयोगः 'भवनम्' अथवा गृहम्' शब्दस्य कृते एतादृशा- "**ता वां वास्तून्युश्मसि गमध्यै.....।**[३] तथा **वास्तोष्पते....**[4] वर्तते। वास्तुशास्त्रं सम्बन्धित शास्त्रमिति वास्तुशास्त्रम्। भारतीय परम्परायां वास्तुशास्त्रम् अर्थात् निर्माण-अभियान्त्रिकी (science of architecture)अस्माकं प्राचीनानाम् ऋषीणां अथवा मनीषिणाम् अद्वितीयं ज्ञानकोषात् उद्धृतम् इति मन्यन्ते।

---

1 (क)हिन्दी विश्वकोश, खण्ड-२१,पृ२३६ (ख) शब्दकल्पद्रुम,भाग-४,पृ-२५८

2 अमरकोष, काण्ड-२,पुरवर्ग-१९

3 ऋग्वेद,१.१५४.६

4 ऋग्वेद, ७.५४.१-३,७.५५.१

**२. वास्तोः क्षेत्रम् -**

वास्तुशब्दस्य सामान्यमर्थः निवास-योग्या भूमिः वा भवनम् इति। परन्तु वास्तुशास्त्रीयग्रन्थेषु वास्तोः अभिप्रायः व्यापकमस्ति। विश्वकर्मवास्तुशास्त्रग्रन्थे आचार्य विश्वकर्मा कथयति यत्-

**देवतानां नराणाञ्च गजगोवाजिनामपि।**

**निवासभूमिशिल्पज्ञैर्वास्तुसंज्ञमुदीरितम्।।**[1]

अर्थात् यत्र देव-मनुष्य-गज-अश्व- गवादीनां पशूनां निवासं कुर्वन्ति इति वास्तु।

एतेन प्रकारेण मानसारग्रन्थे-

**तैत(ति)लाश्च नराश्चैव् यस्मिन्नस्मिन् परिस्थि(ष्ठि)ताः।**

**तद्वस्तु सु(सू)रिभिः प्रोक्तां(क्तं) तथा वै वक्ष्यतेऽधुना।।**[2]

तथा मयमतग्रन्थेऽपि-

**अमर्त्याश्चैव मर्त्याश्च यत्र-यत्र वसन्ति हि।**

**तद् वस्त्विति मतं तज्ज्ञैः ...............।।**[3]

मानसारमयमतग्रन्थानुसारं 'यत्र अमर्त्याः मर्त्याश्च वसन्ति इति वास्तु'। अन्यच्च भवननिर्माणे प्रायोजितानि अन्यद्रव्याणि तथा मानवजीवनोपयोगि सुखप्रदायकवस्तूनि अपि वास्तोः अन्तर्गतमेव भवान्ति। विश्वकर्मवास्तुशास्त्रसंज्ञक ग्रन्थानुसारम् –

[1] विश्वकर्मवास्तुशास्त्रम्, अ.७.१

[2] मानसार, अ.३.१

[3] मयमतम्, अ.२.१

**इष्टिका च शिला दारुदयः कीलादयोऽप्यमी।**

**वास्तुकर्मणि चान्यत्र वास्तुसंज्ञमुदीरितम् ।।**[१]

अर्थात् इष्टिका –शीला–वृक्ष(काष्ठ)–कीलादिद्रव्यानि वास्तुसंज्ञकं ज्ञायते।

मानसारे तथा मयमतग्रन्थेऽपि–

**धराहर्म्यादि यानं च पर्यङ्कादि चतुर्विधम्।**

**धरा प्रधानवस्तु स्यात्तत्तज्जातिषु सर्वशः।।**[२]

**भूमिप्रासादयानानि शयनं च चतुर्विधम्।**

**भूरेव मुख्यवस्तु स्यात् तत्र जातानि यानि हि।।**[३]

अर्थात् मानसारमयमतमनुसारं वास्तुशास्त्रान्तर्गतभूमिः, हर्म्यः वा प्रासादः, यानः, तथा पर्यङ्कः वा शयनम् इत्यादीनां सङ्कीर्तनं दृश्यते।

एतेषु ग्रन्थेषु उपर्युक्तवस्तूनां वास्तुसंज्ञान्तर्गतं स्थापयित्वा भूरेव मुख्यवस्तु स्यात् इति दर्शितम्। कारणम् एतेषां वस्तूनां निर्माण मूलम् –आधारः– उत्पतिस्थानमेव भूमिरेव अस्ति। भूः एव सर्व वस्तुनामाधारेव अस्ति।

कौटिल्येन अपि स्वकृत कौटिलियअर्थशास्त्रे वास्तुशब्दस्य प्रयोगः अत्यन्तं विस्तृतमर्थं ददाति। तेषामनुसारम्–

**गृहं क्षेत्रमारामःसेतुबंधस्तटाकमाधारो वा वास्तुः।**[१]

---

[1] विश्वकर्मवास्तुशास्त्रम्, अ.७.६१

[2] मानसार, अ. ३.२

[3] मयमतम्, अ.२.२

अनेन प्रकारेण विस्तृत अर्थे वास्तुतात्पर्यं केवलं सामान्यजनस्य निवासयोग्य भवनं एव न, अपितु राजभवनं, देवप्रासादः, ग्रामः, नगरं, रथ्या, मार्गः, प्राकारः, परिखा, प्रासादः, मण्डपं, यज्ञ–वेदी, सभागृहं, कूपः, सरः, वापी, स्तूपः, इत्यादीनां सर्वेषां निर्माणार्थमस्ति। जनानां निवासनार्थंमेवं तेषामभिष्टजनेन सह देवानां निवासस्थानादिरूपमस्ति। अतः वास्तोः अर्थः केवलं गृहम् एव नास्ति परन्तु गृहादि भवति। तदनुसारं वास्तुशसास्त्रस्य प्रतिपाद्यविषयः मानवभवनम्, प्रकारः, परिखा, देवप्रासादः, मण्पः, सेतुबन्धः, मार्गः, तडागः, प्रत्येकं प्रकारस्य भवनम्, क्षेत्रं, कूपः, इत्यादीनां रचनायाः तथा साधनस्य व्याख्यां करोति। मानसारे, मयमते, शिल्परत्नादिषु वास्तुशास्त्रीयग्रन्थेषु वास्तोः अर्थः क्षेत्रम् इति विद्यते, परन्तु समराङ्गणसूत्रधारग्रन्थे –

**देशः पुरं निवासश्च सभा वेश्मासनानि च।**
**यद्यदीदृशमन्यच्च तत्तच्छ्रेयस्करं मतम्।।**
**वास्तुशास्त्रादृते तस्य न स्याल्लक्षणनिश्चयः।**
**तस्माल्लोकस्य कृपया शास्त्रमेतदुदीर्यते।।** [२]

पुरं, निवासः, सभा, वेश्म, आसनादि तदतिरिक्तं देश–वर्णनमपि अस्य शास्त्रस्य विषयः अग्रे गच्छति। समराङ्गणसूत्रधारग्रन्थे वास्तुशास्त्र–विषय–वर्गनामके अध्याये महासमा(पृथ्वी) आगमनम्, सौरमण्डलस्य गतिविधिः, सम्पूर्ण महासमायाः निवेशोपक्रमः, वसति–योग्यता, वास–स्थानम्, जनपद–निवेशश्च सृष्टिविभागः, एवं भूगोलादि वर्णनं वर्णितं वर्तते।[३] विशुद्धः, परिमार्जितः, एवं परिष्कृतः

---

[1] कौटिलीय अर्थशास्त्रम्, अधिकरणम्–३,अ.८

[2] समराङ्गणसूत्रधारः, अ.१.४–५

[3] समराङ्गणसूत्रधारः, अ.३

वास्तुशास्त्रीयग्रन्थे समराङ्गणसूत्रधारग्रन्थे महासमा अगमनम् (अध्याय–१), महदादिसर्गः(सृष्टि–वर्णनम्)(अ.–४), तथा भुवन–कोश(भूगोल–वर्णनम्)(अ.–५) विश्वयोजनायाः सङ्केतं करोति। अनेन प्रकारेण भारतीयवास्तुशास्त्रस्य विषयः सामान्यभवनं, प्रासादाः, ग्रामः, खेटकः, पत्तनः, पुटभेदनम्, एवं नगर पर्यन्तमेव सिमितं नास्ति परन्तु जनपदम्, जनपद–समूहः, राष्ट्रः राष्ट्र–समूहः पर्यन्तं विस्तृतं वर्तते। यदा समस्त भूमण्डलं च सौरमण्डलं वास्तोः विषयमस्ति तदा वास्तोः व्याख्या भवननिर्माणपर्यन्तं सिमितं स्थापनमेकम् अभीशापः भवति।[1]

भारतीयस्थापत्यानुसारं वास्तु–विनियोजना समस्तभूमण्डलनां कृते अस्ति। भारतीयदृष्टिकोणात् स्थापत्यान्तर्गतसम्पूर्णं भूमण्डलमेव न अपितु सम्पूर्णं विश्वमेव प्रतिपाद्येः विषयः अस्ति, कारणं भारतीयस्थापत्ये समस्तविश्वस्य चिन्तनमस्ति। किमपि निर्मितं वास्तु अस्ति, कस्याः अपि योजनायाः वास्तु अस्ति। अतः कथितुं शक्यते यत् – भारतीय स्थापत्यस्य विस्तृतं –व्यापकं दृष्टिकोणम् अस्ति।

### ३. **वास्तुशिल्पः वास्तुकला च –**

उत्तरभारते स्थापत्यग्रन्थानां कृते वास्तुशास्त्रम्, तथा दक्षिणभारते शिल्पशास्त्रमिति शब्दप्रयोगः दृश्यते। किन्तु द्वयोः शब्दयोः क्षेत्रे भिन्नता वर्तते। डॉ. पी.के. आचायर्स्य मतानुसारं वास्तुशास्त्रम्, शिल्पशास्त्रस्यान्तर्गतमागच्छति। आचार्यमहोदयः भृगुसंहितायामुद्धृतां कृत्वा लिखति यत्– महर्षिः भृगुः शिल्पशास्त्रस्य कृषिशास्त्रम्, जलशास्त्रम्, खनिजशास्त्रम्, नौकाशास्त्रम्,

---

[1] समराङ्गणसूत्रधारः, भवन–निवेशः,भाग–१,हिन्दी अनुवादः,पृ–११

अग्नियानशास्त्रम् तथा वास्तुशास्त्रादि दश उपशास्त्रम् दर्शयति [१] । अतः शिल्पकला वास्तुशास्त्रस्यान्तगमागच्छति [२] ।

डॉ.शुक्लस्य कथनानुसारं वास्तुशब्दः शिल्पशब्दस्यापेक्षया अधिकतं प्राचीनमस्ति। ऋग्वेदे सर्वप्रथमं वास्तुशब्दप्रयोगः भवनम् इति शब्दस्य स्थाने प्रयोजितमस्ति। तथा यः शास्त्रं भवनसम्बन्धितं व्याख्यां करोति, एतत् शास्त्रं वास्तुशास्त्रम् इति ज्ञायते। पुनः अथर्ववेदस्य उपवेदरूपेण स्थापत्यवेदः , कालान्तरे स्थापत्यशास्त्रम्, वास्तुशास्त्रम्, च शिल्पशास्त्रम् इति त्रिणि पर्यायवाचीनि नामानि साम्प्रतसमये व्यवहृतमस्ति ।[३]

अतः संसारस्य प्राचीनतमे गौरवान्विते साहित्ये ऋग्वेदे वास्तुशब्दस्य प्रयोगः भवनम् इति विद्यते तथा समराङ्गणसूत्रधारग्रन्थे अपि वास्तोः अन्तर्गतं समस्तविश्वस्य चिन्तनं दृश्यते। पुनश्च कथितुं शक्यते यत्- वस्तुशब्देन वास्तुशब्दः निषपन्नः तथा किमपि निर्मितवस्तु इति वास्तुः एव अस्ति। अस्याधारेण डॉ. शुक्लस्य मतं युक्ति-सङ्गतं प्रतीतं भवति। सः कथयति मानसारः, मयमतम्, इत्यादि दक्षिणभारतीयग्रन्थाः अद्यपि वास्तुशास्त्रं एव प्रतिपादयति परन्तु तत्र शीर्षकरूपेण वास्तुशास्त्रस्य स्थानस्योपरि शिल्पशास्त्रम् इति शब्दप्रयोगः कुर्वन्ति। अतः दक्षिणभारतीयपरम्परायां वास्तुशास्त्रीय ग्रन्थानां शिल्पशास्त्रम् इति संज्ञरूपेण किर्तीतम्। दक्षिणभारतस्य वास्तुकलायां चित्रकलायाः प्राधान्यमधिकं वर्तते, अतः वास्तु अर्थात् भवनकला अपि विशेष प्रकारेण शिल्पकला अर्थात् मूर्तिकलारूपेण परिणितं जातम्। अतः तत्र

---

[1] मानसार,भूमिका-भाग,पृ.१

[2] समराङ्गणसूत्रधार वास्तुशास्त्रम्,(भवननिवेश,भाग-१,हिन्दी अनुवादः),पृ.१९

[3] समराङ्गणसूत्रधार वास्तुशास्त्रम्,(भवननिवेश,भाग-१,हिन्दी अनुवादः),पृ.१९

वास्तुशास्त्रीयग्रन्थाः अपि शिल्पशास्त्रम् इति शीर्षकरूपेण अङ्लकृतमभवत्।[१] वास्तुशास्त्रस्य तथा शिल्पशास्त्रस्य व्यापकतायां भिन्नता अस्ति।

वास्तुशास्त्रमिति शब्दस्य व्यापकः अर्थो भवति। वास्तुशास्त्रस्यान्तर्गतं स्थापत्यं, तथा स्थपत्यान्तर्गतं शिल्पम्।

**(अ) वास्तुशास्त्रम् - (वास्तुकला)–**

वास्तुकलायाः इतिहासः अत्यन्तं प्राचीनः अस्ति। सामान्यतया निवासस्थानमति वास्तुः, तथा तत्सम्बन्धिताः कलाः इति वास्तुकलाः। कस्यापि स्थानं वासयोग्यं निर्मीयते यथा कला वास्तुकला।[२] भवनस्य विन्यासः, आकलनं, रचना एवं परिवर्तनशीलसमयानुसारं यान्त्रिकी एवं यथारुचि मानवजीवनावश्यकायाः संतुष्टार्थं सर्वप्रकारेण योग्यं निर्माणकलायाः, विज्ञानस्य तथा यान्त्रिकीकलायाः सम्मिश्रणमिति वास्तुकलायाः परिभाषा अस्ति[3]। वास्तुकला ललितकलायाः एका शाखा अस्ति, तस्य उपयोगितायाः दृष्ट्या उद्देश्यम् उत्तम–भवनस्य निर्माणं करणीयम्, तस्य पर्यावरणं सुसंस्कृतमेवं कलात्मकं रुच्यार्थमत्यन्तं प्रियं, सौंदर्य–भावना–पोषकं,तथा आनन्दवर्धनं भवति। प्रकृत्या, बुद्ध्या तथा रुच्यानुसारं निर्धारितं कतिपयसिद्धान्तानुसारं निर्मिता रचना वास्तुकलायाः अङ्गमस्ति। पूर्वनिर्धारितयोजनानां साकारं कृत्वा तत्र अधिकतमं सुविधया सह उपयुक्त योजनायां रोचकता, सौन्दर्येन, महन्तया च एकता–सृष्टि निर्मीयते यत् वास्तुकौशलमस्ति। प्रारम्भिकावस्थायां वास्तुकलायाः स्थानं मानवस्य सीमित

---

[1] समराङ्गणसूत्रधार वास्तुशास्त्रम्,(भवननिवेश,भाग–१,हिन्दी अनुवादः),पृ.१८

[2] हिन्दी विश्वकोश, खण्ड–१०,पृ–४४८

[3] हिन्दी विश्वकोश, खण्ड–१०,पृ–४४७

प्रयोजनार्थं आवश्यक व्यवसायानां कृते प्रायः एक प्रकारस्य रक्षा–स्थान प्रदानार्थमासीत्। परन्तु वास्तु–कृतयः तस्य गर्वः, प्रतिष्ठा, महत्त्वाकाङ्क्षा, तथा आध्यात्मिकतायाः प्रकृति पूर्णतया अभिव्यक्तं भवति एषा वास्तुकृतयः मानवीये इतिहासे महत्त्वपूर्णं भवति।[१]

प्राचीनकाले वास्तुकला सर्वकलायाः जननी मन्यते स्म, परन्तु वृत्तिपरिवर्तनेन तथा सम्बन्धितव्यवसायस्य विभाजनेन एतत् मान्यता अधुना न दृश्यते। वास्तुकलायाः पुरातनकालीनसामाजिकस्थितिदर्शनस्य मुद्रणालयः कथ्यते। वास्तुकला सभ्यतायाः प्रतिबिम्बमस्ति। वास्तुकलायाः इतिहासस्योपरि दृष्टिपातं क्रियते तदा यः स्पष्टं भवति यत्– प्राचीनतमसमये तस्य स्वरूपं भिन्नमेव आसीत्। येषां वास्तुकलायाः कालादाराभ्य विकासः अभवत्, तथा मानवस्य परिवर्तनशीकावश्यकतायाः सुरक्षा, कार्यं, धर्मः, आनन्दः च अन्ययुगप्रवर्तक चिन्हरूपः अभूत्।[२]

वास्तुशास्त्रं देशः,नगरं, ग्रामं, खेटं, कर्वटं, दुर्गः, जलाशयः, वापी, कूपः, तडागं, भूमिः, शयनं, यानं, देवप्रासादः, राजप्रासादः, गृहं, भवनं, मण्डपं, वेदी, उद्यान–वाटिका, आरामगृहं, सामान्यगृहं, शल्यज्ञानं, शिराज्ञानं, मर्मवेधः, भूपरीक्षा, भूलक्षणं, वास्तुकर्मणि शुभाशुभवृक्षाः, पशु–पक्षि–गृहश्च, सेतुबन्धः वास्तुकर्मणिविविध–शुभाशुभ–मुहूर्तानि, द्वारनिर्णयं, विविधालङ्क्करणम्

---

[1]हिन्दी विश्वकोश, खण्ड–१०,पृ–४४७

[2] हिन्दी विश्वकोश, खण्ड–१०,पृ–४४७

इत्यादिकौर्विषयैः समन्वितं वर्तते।[1] देवमनुष्यराजप्रासादानामत्र नगरग्रामादि रचनानां विशेषतो विचारोऽत्र क्रियते।

वास्तुशास्त्रं व्यापकः शब्दो भवति। वास्तुशास्त्रस्यान्तर्गतं स्थापत्यं, तथा स्थपत्यान्तर्गतं शिल्पम्।

**(ब) स्थापत्यम् –**

दुर्गः, जलाशयः, राजप्रासादः, देवप्रासादः, भवनं, सामान्यगृहम्– इत्यादि निर्माणं स्थापत्यकला ज्ञायते। इदं विशेषरूपेण शिल्प–स्थापत्य–शास्त्रं कथ्यते।[2]

**(क) शिल्पविद्या –**

दुर्गद्वारं, जलाशयं, राजप्रासादः, देवप्रासादः, इत्यादयः स्थापत्यस्य सुशोभनम्– अङ्लकृतिः, गवाक्षं, प्रतिमानिर्माणम् इत्यादिकं शिल्पविद्या ज्ञायते।[3]

भारतीयसांस्कृतिकपरम्परा अत्यन्तं प्राचीना अस्ति। अतः पुरातन कला–परम्परा अपि एतादृशा एव अधिकं प्राचीना वर्तते। तेषां ज्ञानं वयं प्राचीनतमं साहित्यस्य अध्ययनेन तथा पुरातत्त्वविज्ञानस्य अन्वेषणेन एव प्राप्तुं शक्नुमः। संसारस्य प्राचीनतं साहित्यं वेदाः, तस्य अनुशीलनेन विदितं भवति यत् – अद्य सुसंस्कृतमेवं सभ्य राष्ट्रे ये ये कलायाःज्ञायते तेषां प्रमुख कलाः भरत–गुंथन (बुनाई) – 'वासोवायोऽवीनामा वासांसि ममृजत्।[4] उर्णावती युवतिः

---

[1] क्षिरार्णव , प्रस्तावना, पृ– ४

[2] क्षिरार्णव , प्रस्तावना, पृ– ४

[3] क्षिरार्णव , प्रस्तावना, पृ–४

[4] ऋग्वेद, १०.२६.३

सीलमावती......।[१] पुमाँ एनं तनुत उत्कृणोत्ति पुमान्वित तत्ने अधि नाके अस्मिन्।[२] सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति।[३]

बठई (गुन्थन) तक्षा रिष्टम्........।।(**ऋग्वेद, ९.११२.१**), अहं बन्धुरं पर्यचामि ह्यदा मतिम्।(ऋग्वेद, **१०.१३०.२)**

वि मृळीकाय ते मनो रथीरश्वं न संदितम्।।[४] वेदा यो वीनां पदमन्तरिक्षेण पतताम्। वेद नावः समुद्रियः।।[५]

**रथाय नावमुत नो गृहाय नित्यारित्रां पद्धतीं रास्यग्ने।**

**अस्माकं वीरॉं उत नो मघोनो जनॉंश्च या पारयाच्छर्म या च।।**[६]

**नमस्तक्षभ्यः रथकारेभ्यश्च वो नमः. .......।।**[७]

**त्वष्ट्रेव रूपं सुकृतं स्वधित्यैना एहाः परि पात्रे ददृशाम्।**[८] **,**

**ये धीवानो रथकाराः .......।**[९]

---

[1] ऋग्वेद, १०.७५.८

[2] ऋग्वेद, १०.१३०.२

[3] यजुर्वेद १९.८० आदि

[4] ऋग्वेद, १.२५.३

[5] ऋग्वेद, १.२५.७

[6] ऋग्वेद, १.१४०.१२

[7] यजुर्वेद, १६.२७

[8] अथर्ववेद, १२.३.३३

[9] अथर्ववेद, ३.५.६ आदि

**(१) लोहकर्मम्** -

त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दध।[1], ब्रह्मणस्पतिरेता सं कर्मरइवाधमत्।[2]

......कर्मरेभ्यश्च वो नमो।(यजुर्वेद, १६.२७), . .....हिरण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम्।।(यजुर्वेद, १८.१३)

**(२) भैषज्यकला –**

यतं भिषग्ब्रह्मा सुन्वन्तम्........।।( ऋग्वेद, ९.११२.१, यजुर्वेद, १९.१६), इत्यादि वैदिकयुगे प्रसिद्धं कलाः असीत्। तेषां वास्तुकला अपि सम्मिलितमासित् यथा– 'राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्त्रस्थूण आसाते।।'(**ऋग्वेद, २.४१.५**) तथा '........प्र याहि कल्याणीर्जाया सुरणं गृहे ते।'(**ऋग्वेद, ३.५३.६**) शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत्।(ऋग्वेद,४.२०.३०) , ........शतं पूर्भिरायसीभिर्नि पाहि।(ऋग्वेद, ७.३.७), ........गन्तारा दाशुषो गृहम्।(ऋग्वेद, ८.२२.३) ,तथा द्रष्टव्य– ऋग्वेद, ७.५.३, ७.५६.१६, ८.२६.१७, आदि स्थानेषु वासतुकलायाः प्रमाणं प्राप्यते। अनेन प्रकारेण वयं सिन्धु – घाटी सम्बन्धित संस्कृति प्रायः ई.पू. ३०००वर्षाणि मन्यते, तेन स्पष्टं ज्ञातं भवति यत्–तत्कालेऽपि वास्तु,

---

[1] ऋग्वेद ९.११२.२

[2] ऋग्वेद, १०.७२.२

मूर्ति, चित्र, भाण्ड–निर्माणं च लौहवस्तु–रचना इत्यादि नैक प्रकारस्य भौतिक कलाः प्रसिद्धमासीत्। [१]

वेदेषु अर्चा–वास्तु अर्थात् यज्ञ–वेदी आदि तथा लौकिक वास्तु अथ्रात् गृह तथा नगर आदि निर्माणस्य वर्णनं प्राप्यते। न केवलं वेदेषु अपितु समस्त वैदिक साहित्येषु वास्तुकला सम्बन्धीतं प्रभूतमात्रायां वर्णनं उपलब्धमस्ति। तत्रे लौकिकं तथा अर्चा–वास्तु द्वर्यो प्रकारस्य स्थापत्यस्य विस्तृतं वर्णनं दृश्यते। सामान्य भवनं तथा विशाल भवनमतिरिक्तं एतत् साहित्येषु त्रिभूमिक–प्रासादः, सहस्त्र स्तम्भाः एवं सहस्त्र द्वारैः युक्तः सभा–कक्षः आदि रचनायाः उल्लेखं प्राप्यते। नगर–सन्निवेशस्य विवरणमपि वैदिक साहित्ये उपलब्धमस्ति।

सम्पूर्ण वैदिक साहित्यस्योपरि दृष्टिपातं क्रियते तदा ज्ञातं भवति यत्– भारतीय वास्तुकलायां धार्मिक संस्काराणमनुप्रणितमस्ति तथा सौन्दर्यं च आनन्ददायक तत्त्व द्वारा परिपूर्णमपि अस्ति। शिल्पी भारतीय शिल्पस्य विभिन्न अङ्गानां कल्पना द्वारा अलङ्कृतं– मण्डितं करोति।

## ४. भारतीय वास्तु परम्परा–

### (अ) धार्मिक वास्तु–

वैदिकवाङ्मये भक्तेः वा उपासनायाः मूलं बीजं निहितमस्ति तस्य पल्लवनं परवर्तिभारतीयसाहित्येषु एवं कलायां प्राप्यते। आगमपुराणेषु उपासनापद्धतिः विष्णु, सूर्य, शिवादि देवानामर्चनपूजनयोः महत्त्वं प्रतिपादितमस्ति। तेन कारणेन

[1] स्वतन्त्रकलाशास्त्र, भाग–२, पृ–७

मूर्तीनां तथा मन्दिराणां व्यापकरूपेण निर्माणमभवत् तथा मन्दिरं धार्मिकं वास्तोः प्रमुखं प्रतिकं अभूत्।

मन्दिररूपविधानस्य कल्पना एकयुगस्य कार्यं नास्ति अपि तु शिल्पि–कलाकाराणां ध्यानावस्थितं भूत्वा नूतने चिन्तने स्वकुशलतायाः प्रदर्शनं करोति। प्रारम्भे चैत्याकारेषु प्रेरणां गृहीत्वा तथा गर्भगृहस्य नामकरणमपि विहारेषु स्थिता प्रतिमा–स्थानाधारेण कदाचित् निश्चितं कृतम् इति वक्तुं शक्यते। विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे विश्वकर्माः गर्भगृहस्य व्याख्यां एतादृशीं कथयति–

**हरेर्हरस्य धातुर्वा तद्देवीनामनेकधा।**

**आधारासनसंयुक्तं स्थानं गर्भगृहं मतम्।।**[१]

तथा समराङ्गणसूत्रधारग्रन्थेऽपि –

**संछन्ना(चा ? शा) पि यस्य स्यात् तद् गर्भगृहमुच्यते।**[२]

गर्भगृहस्य व्याख्यां भोजदेवः करोति। कालान्तरे वास्तुशास्त्रस्य प्रभावेण सम्पूर्णदेशे मन्दिरस्य विभिन्नरूपरेखा प्रसिद्धा जाता। यः परमात्मा मनुष्यशरीरेषु अन्तर्निहितोऽस्ति, सः सूक्ष्मरूपेण विराजमानोऽस्ति, तस्य प्राणप्रतिष्ठां कृत्वा देवालये स्थापयन्ति। अतः एव मूर्तिकाराः यस्य यस्य देवस्य मानवरूपेण प्रतिमां निर्माय तस्य मन्दिरस्य गर्भगृहे स्थापयन्ति।[३]

---

[1] विश्वकर्मवास्तुशास्त्रम्, अ.७३.१

[2] समराङ्गणसूत्रधारः, अ–२२.२०

[3] प्राचीन भारतीय स्तूप,गूहा एवं मन्दिर, पृ–२००

'भारतीयवास्तुकला का इतिहास' नामक ग्रन्थे कृष्णदत्त वाजपेयी महोदयः अपि प्रारम्भिकमन्दिरस्याकारंप्रकारहेतुः मानवशरीरं तथा वृक्षः एवं गिरिशिखरीणि प्रेरणास्रोतः इति।[१]

पुरातत्त्वीयावशेषाणां मन्दिरस्य स्वरूपं, प्राचीनाप्रतिमाः, मूद्राः(सिक्का), इत्यादि प्राप्यन्ते। एतत् स्वरूपं दृष्टवा ज्ञातं भवति यत् प्रारम्भे मन्दिरस्य वा देवतायनस्य स्वरूपं सामान्यरूपेण आसीत्। यथा– प्रकृतभूम्याः किञ्चित् उच्चस्थानस्योपरि प्रतिमायाः स्थापनं क्रियते स्म। तस्य चतुर्दिक् भित्तिनिर्माणं क्रियते स्म। पश्चात् वेदिकायाः उपरि अपि आच्छादनमकरोत् । मथुरा, विदिशा, मध्यमिका आदि प्राचीन नगरेषु सङ्कर्षणः, वासुदेवः, इत्यादीनां मन्दिराणामिदं स्वरूपं वर्तते। कालन्तरे कलात्मक रूपेण अभिवृद्ध्या सह मन्दिरवास्तु स्वरूपमेव संवर्धितमभवत्। यथा जैनतीर्थङ्काराः, यक्षाः, तथा नागानां कृते प्रारम्भिक मन्दिरस्य स्वरूपमेव उपर्युक्तमन्दिराणां सदृशं स्यात्।[२]

प्राचीनभारतीयस्थापत्ये वास्तुकलायां काष्ठस्य प्रयोगः अधिकमभवत्, कारणमस्माकं देशे वनानि बहूनि आसन्, तथा काष्ठादिस्थापत्यवस्तूनि सुलभतया उपलब्धानि भवन्ति स्म। साँची तथा भारहुतस्य प्राचीन संस्थायाः इदम् अनुमास्य समुचितं प्रमाणमुपलभ्यते। वेदिका, तोरणश्च काष्ठेन निर्मितः भवति स्म, अनन्तरं पाषाणस्योपरि तस्य अनुकृतिः न किन्तु अनिवादः प्रतीतः भवति। उत्कीर्णं शिलापट्टस्योपरि दृश्यमङ्कितं दृश्यते, तेषामपि भित्तिगर्भः, प्रासादिकाः, अण्डाकारा छदिः, स्तम्भाः, छाद्यः सभा इत्यादीनां निर्माणे काष्ठं च वंशवृक्षस्य प्रारूपमेव

---

[1] भारतीय वास्तुकला का इतिहास,पृ–३

[2] भारतीय वास्तुकला का इतिहास,पृ–३

दृश्यते।[१] यद्यपि वास्तुकलायाः विकासे जैनजनानामेव योगदानमपि अस्ति, तथा अतीवप्राचीनजैनावशेषाः मथुरात् प्राप्तं भवति। एतेषामेकं जैनस्तूपस्य समयः ७७७ ई,पू. निश्चितं कृतम्, किन्तु विधिवतरूपेण वास्तुकलायाः प्रोत्साहनं सर्व प्रथमं बौद्धधर्मः दत्तम्।[२] महात्मनः बुद्धस्य प्रादूर्भावेन भारतीय इतिहासे एकं नवीनयुगस्य प्रारम्भमभवत्। ई.पू. ६ शताब्ध्यां साहित्यिकं च पुरातात्त्विकं द्वयोर्प्रकारस्य ऐतिहासिकं साधनमधिकपरिमाणेन उपलब्धमभवत्। मोर्य–युगे तेषामपेक्षया अपि अधिकं विकासं जातम्।

अस्मिन् युगे बौद्धधर्मस्य विकासेन सह वास्तुकलायाः विकासोऽपि अभवत्। मोर्य–सम्राट अशोकः यदा बौद्धधर्मस्य अङ्गीकारं कृतवान् तदा तस्य प्रचार–प्रसारस्य प्रयत्नं करोति स्म तदा स्थापत्यस्य तथा मूर्तिकलायाः उन्नतिमपि द्रुतगत्या प्राप्तं भवति स्म। अस्मिन् काले महत् भव्य स्तूपनिर्माणमपि कृतम्। तेषां साँची, भारहूत, अमरावती तथा सारनाथस्य स्तूपः च सन्ति। मौर्यसम्राटअशोकः सम्पूर्णे देशे बौद्ध स्तूपस्य निर्माणं कृतवान्। तत्पश्चात् स्तूपनिर्माणस्य परम्परायाः विकासः जातः।[३] उत्तर–पश्चिम सीमान्त प्रदेशः पेशावरे च चरसद्दा प्रदेशे विशाल स्तूप निर्माणमभवत्, तेषां सुधाया एवं मृण्मय पट्टिकेन द्वारा सुन्दरं प्रयोगः कृतः।[४] स्तूपनिर्माणस्य उद्देशः कस्य अन्यस्य बौद्धसन्तस्य अवशेषस्योपरि समाधि स्थानस्य निर्माणमथवा कस्य स्थान सम्बन्धितस्य तथा पवित्र जैन अथवा बोद्ध

---

1 मध्यकालीन भारतीय कलाएँ एवं उनका विकास,पृ–३१

2 मध्यकालीन भारतीय कलाएँ एवं उनका विकास,पृ–३१

3 भारतीय वास्तुकला का इतिहास,पृ–३

4 मध्यकालीन भारतीय कलाएँ एवं उनका विकास,पृ–३१

गाथायाः समस्त निर्गतानां पवित्रघटनानां स्मरणीयरचना निर्माणं करणीयमासीत्। अस्मिन् काले बृहद्-बृहतः भव्य गुहायाः निर्माणमपि जातम्, येषां चैत्यविहाराणां निर्माणमपि जातम्। एषां कर्तनेन सुन्दरः गवाक्षः, सत्म्भयुक्त कक्षः, तथा गज-पृष्ठाकार छाद्य निर्माणमभूतम् अपितु प्रतिमानिर्माणमपि जातम्। तस्य निर्माणं ई.पू. द्वितीय शताब्द्यात् ई.पू. अष्टमी शताब्द्यी पर्यन्तमभवत्। तेषां कार्ली, कन्हैरी, भज, कान्दन, वेदसा, नासिक, पीतलखोडा तथा अजन्तायाः गूहाः प्रमुखं प्रसिद्धं वर्तते।[१] अजन्तायाः सुन्दर गूहाः अस्य युगस्य अद्भूतं कृतिरस्ति। एषां सुन्दराणि चित्राणि चित्रिताणि दृश्यन्ते।तेषां भगवातः बुद्धस्य जातककथायाः अङ्कनं दृश्यते।[२] भारतीयकलानां विकासे अजन्तायाः महत्त्वपूर्णं स्थामस्ति।

हिन्दुजनानां वैष्णवस्य च शिवस्य मन्दिरस्य विकासः गुप्तकाले अभवत्। गर्भगृहस्य बर्हिः स्तम्भयुक्तस्य एक अलिन्दस्य निर्माणं जातम्। हिन्दु-मन्दिरस्य एषा मूल योजना आसित्। देवगढ, बर्वासागर,च भूमरायाः मन्दिरमस्य युगस्य दृश्यते। पश्चात् तत्र मण्डपः , अर्धमण्डपः, तथा प्रदक्षिणापथ मिलित्वा निर्माण रचनाविधानस्य विकासः जातः। शनैः शनैः शिखर पल्लवितमभवत्, एतादृशा दशम शताब्दी पर्यन्तं हिन्दुमन्दिरमेकस्य भव्यप्रासादस्य स्वरूपं प्राप्तं जातम्। [३]। खजुराहोमन्दिराणां तस्य चरमोत्कृष्ट स्वरूपं प्रकटं जातम्। उडीसायां तथा दक्षिण-भारते येषा योजनायाः विकासः विविध स्वरूपेण अभवत्। दक्षिणभारते शिखरस्य स्वरूपं भिन्नं जातम्। तत्र अण्डाकारशिखरस्य प्रयोगः कृतं वा गोपुरं निर्माणं

---

[1] मध्यकालीन भारतीय कलाएँ एवं उनका विकास,पृ-३२

[2] मध्यकालीन भारतीय कलाएँ एवं उनका विकास,पृ-३२

[3] मध्यकालीन भारतीय कलाएँ एवं उनका विकास,पृ-३२

कृतवन्तः , किन्तु तेषां सासंस्कृतिक विचार भेदः नास्ति। गुजराते काष्ठ प्रयोगः भवति स्म, तथा काष्ठ रचना–विधि प्रेरित तत्त्वानां बाहुल्यमपि समानमेव अस्ति। तेषां तोरणं, प्रासादिका च क्षितिजाकारः क्रमशः छाद्यप्रमाणं न्यूनं जातमिति उल्लेखनीयमस्ति।[१] अस्माकं देशे स्थापत्य सम्बन्धि निर्माण कार्ये इष्टिकायाः अपि प्रयोगः भवति। हडप्पा सभ्यतायाम् इष्टिकायाः प्रयोगस्य प्रमाणं प्राप्यते।[२] स्तूपनिर्माणेऽपि इष्टिकायाः प्रयोगः क्रियते स्म। यथा मीरपुरखास, मालोट, काफिरकोट आदि। गुप्तकाले च तत् पश्चात् इष्टिकाप्रयोगेण भव्यमन्दिराणि निर्मितानि जातानि। तेषां विशेषतः भीतरगाँव, परावली, कुरारी, बोधगया, राजशाही, सीरपुर तथा पुजारीपाली इत्यादि मन्दिराणि उल्लेखनीयानि सन्ति। तेषां क्वचित् क्वचित् त्रिज्याकार महेराबः तथा गुम्बजस्य प्रयोगः अपि दृश्यते। तेषामलङ्करणं छिन्नइष्टिका वा मृण्मयपट्टिका द्वारा क्रियते स्म। तेषां सर्वोत्कृष्टा कृतिः भीतरगॉवस्य मन्दिरमस्ति।[३]

अस्माकं भारतदेशे मोहमदीयानाम् आक्रमणे (दशम् शताब्दायाः उत्तरार्धे मन्यते, परन्तु तराइन युद्ध द्वितीय,११९२ई.स.) मोहम्मद घौरी पृथ्वीराज चौहानस्य पराजयं कृत्वा तस्य वधं कृतवान्। अस्मिन् काले भारतदेशे मुस्लिम शासनस्य प्रारम्भः जातः। इस्लामस्यागमनं पूर्वमेव अस्माकं भारतदेशे वास्तुकला स्वस्य परमोत्कृष्ट शिखरस्योपरि विराजितमासीत्, तथा विश्वप्रसिद्ध भव्य मन्दिराणां

---

[1] मध्यकालीन भारतीय कलाऍं एवं उनका विकास,पृ–३२

[2] (अ) भारतीय कला,पृ.२१,

(ख)प्राचीन भारत का इतिहास(डॉ.रमाशङ्कर त्रिपाठी),पृ–१४–१५,

(ग) भारत का प्राचीन इतिहास(प्रो.सत्यकेतु), पृ–७२–७३

[3] मध्यकालीन भारतीय कलाऍं एवं उनका विकास,पृ–३२

निर्माणं जातम्। तेषां भव्यमन्दिराणि मामल्लापुरमस्य सुन्दररथपट्टादकिलस्य वीरूपक्षस्य मन्दिरं, कान्जीवरमस्य कैलाश मन्दिरम्, तञ्जोरस्य बृहदेश्वरमन्दिरम्, औसिया तथा किराडस्य मन्दिरम्, मोठेरायाः सूर्यमन्दिरम्, आबूनां जैनमन्दिरम्, खजुराहोमन्दिरम्, इत्यादीनि मन्दिराणि विशेषरूपेण परिकीर्तितानि। पाषाणस्य एतेषां भव्यप्रासादानां शिखराणि अत्यन्तं सुन्दराणि निर्मितानि दृश्यन्ते। तेषां देवी–देवानां तथा स्त्री–पुरूषाणां प्रतिमायाः अलङ्करणार्थंप्रयोगः अपि कृतः। मन्दिरनिर्माणेन सह मूर्तिकलायाः विकासः अपि अभवत्, तथा एतेषां शनैः–शनैः कलात्मकतायाः चरमादर्शः अपि प्रातः।[१]

स्थापत्यकालयां पाषाणस्य प्रयोगः व्यापकरूपेण क्रियते स्म। पाषाणस्य स्तम्भाः , भित्तिः, छद्यश्च , शिखरमपि पाषाणस्य एव निर्मीयते स्म। कुत्राचित् पाषाणस्योपरि पाषाणं स्थापयित्वा विना सुधां या वज्रलेपेन निर्माणं क्रियते स्म।

इस्लामस्य आगमनात् पूर्वं अस्माकं भारतदेशे वास्तुकलायाः बृहद् ग्रन्थानां रचना अभवत्, तेषां मानसारः, मयमतम् , (नवम शताब्दी) तथा समराङ्गणसूत्रधार (एकादश शताब्दी) विशेषरूपेण उल्लेखनीयमस्ति। वास्तुकला एका बृहती वास्तुविद्या अभवत्। मन्दिरस्य लघु–लघुनः अङ्गस्य विवेचनं कृत्वा निर्माणसम्बन्धितं न्यूनातिन्यूनम् अङ्गानां निश्चितमान–प्रमाणदण्डं स्थापितं जातम्। शास्त्रीयकरणस्य एषा स्थितिः कलायाः अत्यन्तं विकसितमवस्तायाः सम्बन्धं प्रतिपादयति। एतेषामपि इदं स्पष्टं भवति यत् – अस्माकं देशे मोहम्मदीयागमन

---

[1] मध्यकालीन भारतीय कलाएँ एवं उनका विकास,पृ–३२

समये वास्तुकला अतिवोत्कृष्टावस्थायामासीत् तथा तस्य परम्परा अतीव गूह्यमेवं सुदृढमासित्।[१]

मन्दिर निर्माण समये प्रप्रथमं मन्दिरस्य वा देवालयस्य निर्माणार्थम् उपयुक्त भूम्या: परीक्षणं कृत्वा शुभ भूम्या: परिग्रहणं करणीयम्। गृह्यसूत्रेषु एषां 'भू-परीक्षा' इति कथ्यते। गृह्यसूत्रेषु तथा पौराणिक ग्रन्थेषु एवं स्थापत्य-शास्त्रेषु मन्दिरस्य एत्तम स्थान: प्राय: समुद्र-तट:, सरिता-तट:, सुन्दरमुपवनं, तथा पर्वतीय प्रदेश: अस्ति इति वर्णितं वर्तते।[२] एतानि स्थानानि मनोहरं च पवित्रं तथा शान्तियुक्त वातावरणमपि तत्रे भवति, अत: मनब्दिर निवेशनार्थं उपरोक्त स्थानानि विशेषरूपेण उपयुक्तं भवति। नगरेषु, ग्रामेषु तथा अन्य सामान्य स्थानेषु यदा देवतायतनस्य निर्माणमावश्यकमस्ति तदा तत्र अपेक्षित भूम्या: यज्ञादि द्वारा शुद्धीकरणं कृत्वा तत् पश्चात् एतत् स्थानस्योपरि मन्दिर निर्माणं क्रियते स्म।

**(ब) लौकिक वास्तु** –

धार्मिक वास्तो: अतिरिक्त: भारतीय वास्तो: द्वितीय पक्ष: लौकिक वास्तु: अस्ति। इदं पक्षस्य समर्थनं प्राचीन साहित्य पुरातत्त्विका अवशेषा: दीयन्ते। ग्रामानां, नगराणां सन्निवेशे एवं विभिन्न प्रकारस्य भवनानि, मार्गा:, दुर्गाणि इत्यादीनां निर्माणं लौकिकं वास्तु: ज्ञायते। एतत् सर्वं स्थापत्यान्तर्गतमागच्छन्ति। रामायणं, महाभारतं, अर्थशास्त्रं, जैनमेवं बौद्धं- साहित्येषु तथा मानसारे, मयमते,

---

[1] मध्यकालीन भारतीय कलाएँ एवं उनका विकास,पृ-३३

[2] भारतीय वास्तुकला का इतिहास, पृ-४

समराणङ्गणसूत्रधारे, इत्यादि ग्रन्थेषु नगर सन्निवेशस्य विस्तृतं विवरणं प्राप्तं भवति।

यद्यपि ऋग्वेदे अनेकस्थानस्योपरि नगरस्य उल्लेखः मिलति परन्तु पुरातत्त्वद्वारा किमपि उल्लेखनीयं प्रमाणं प्राप्तं न भवति। एतेन प्रकारेण भारतवर्षे सुनियोजितनगर निवेशनस्य ज्ञानं हडप्पा मोहेज्जोदडो नगरयोः उत्खननेन प्राप्तेन पुरातत्त्विकप्रमाणेन प्राप्यते। कतिपयः विद्वांसः हडप्पा तथा हडप्पा–सभ्यतायाः नगराणि यथा रङ्गपुरं, लोथलः, कालीबंगा नगराणां हवनकुण्डः, अग्निशाला वा वेदी प्रमाणेन तस्य वैदिकं नगरमासीत् इति पुष्टिः क्रियते। आर.अेस. विष्ट(१९९३ ई.) तथा भगवानसिंहः (वैदिक हरप्पन्स,प्रथम संस्करणं, १९९५,ई. पृ–८४–८५) धौलवीरायाः साक्ष्यमेवं ऋग्वैदिक सन्दर्भेन तुलनात्मकमध्ययेनाधारेण एतेषां वैदिक नगरस्य दृष्टान्तं मन्यते।[1] तत् पश्चात् उत्तरोत्तरं नगराणां सख्यायां वृद्धिः अभवत्। राजनैतिकेः, वाणिज्ये, एवं धार्मिकेन कारणेन विभिन्न नगराणां मध्ये आवागमनस्य सुविधायाः विकासः जातः, तथा बृहद् बृहद् राजमार्गाणां निर्माणमपि अभूत्। समृद्ध नगरेषु पुष्कलावती, परूषपुरम्, तक्षशिला, शाकलः, इन्द्रप्रस्थः, हस्तिनापुरम्, अहिच्छत्रा, कान्यकुब्जः, मथुरा, अयोध्या, वाराणसी, श्रावस्ती, वैशाली, पाटलिपुत्रः, राजगृहम्, चम्पा, ताम्रलिप्तिः, प्रयागः, कौशाम्बी, विदिशा, उज्जयिनी, दशपुरम्, भृगुकच्छः, वलभी, प्रतिष्ठानम्, कान्ची, कावेरीपट्टनम्, इत्यादि नगराणि उल्लेखनीयानि सन्ति।

[1] प्राचीन भारत मे नगर तथा नगर–जीवन, पृ–२४– २५ उद्धृतम्

सुरक्षायाः दृष्ट्या नगरस्य चतुर्दिक् एकं वा अधिकं परिखायाः निर्माणं क्रियते स्म। परिखायां प्रायः जलं पूर्यते। तेषाम् आकर्षितं करणार्थं तत्र भिन्न भिन्न वर्णस्य पुष्पाणि उप्यन्ते इति निर्देशः भारतीयस्थापत्यग्रन्थेषु प्राप्यते। नगररक्षा हेतु परिखायाः सह नगरस्य चतुर्दिक् प्राकारः तथा वप्रस्य निर्माणमपि क्रियते स्म। प्राकारस्य निर्माणं पाषाण;, इष्टिका वा सुदृढा मृत्तिका द्वारा क्रियते स्म । कदाचित् मृण्मयी भित्तेःउपरि पाषाणस्य वा पक्वेष्टिकायाः भित्ति निर्माणमपि कुर्वन्ति स्म। प्रकारस्योपरि मध्ये मध्ये यथास्थानम् अट्टालकस्य निर्माणमपि करोति स्म, तत्र नियुक्तः सैनिकः स्थित्वा निरीक्षणं करोति स्म। नगरे प्रवेश हेतुः आवश्यकतानुसारं प्रमुखस्य च गौणस्य प्रवेश द्वारस्य निर्माणं कुर्वन्ति स्म। द्वारस्योपरि अपि सैनिकः उपविशति स्म। नगरस्य अन्तःस्थ मार्गाणां निर्माणं भवति स्म। मुख्यमार्गः एक–द्वयोः समकोणे मिलति। तस्य द्वारा विभाजित क्षेत्रे विशेष वर्गाणां जनानां आवास व्यवस्था करोति स्म। बौद्धलेखकः धम्मपालस्य मतानुसारं ई.पू. ५ शताब्द्यां महागोविन्दः नामकः वास्तुविद्वान् उत्तर भारतस्य नैक राजधान्यानां विन्यासं कृतवान् । नगरस्याकारः प्रायः चतुरस्त्राकारः आसीत् तथा तेषां मध्ये प्रमुखाः राजमार्गाः निर्मिताः भवन्ति स्म। तेषां चर्तुर्णां विभागानां विभाजनं क्रियते स्म इति।[१]

राजप्रासादस्य सन्निवेशनं नगरस्य मध्ये वा प्रमुखस्थानस्योपरि करोति स्म। तद्नुसारं भवनस्य निर्माणं क्रियते स्म। मार्गस्य पाषाणस्य , इष्टिकायाः तथा शीलाखण्डस्य उपयोगः मार्गाणां सुदृठतार्थं क्रियते स्म। नगरस्य उच्छिष्ट दुषितजलस्य निर्गमनस्य सुयोग्य व्यवस्था नगर योजनायाः महत्त्वपूर्णमङ्गमासीत्।

[1] हिन्दी विश्वकोश, खण्ड–१०,पृ–४५०

एतस्य नियम प्रमाणस्य पुष्टिं हडप्पा, मोहनजोदडो, लोथल, कौशाम्बी आदि प्राचीन नगरस्य उत्खननेन प्राप्तं भवति।

राजप्रासाद: तथा विशाल भवनानामतिरिक्तसामान्य जनानां कृते अपि वायु:, प्रकाशश्च आवागमनस्य उचितं ध्यानमपि ददाति स्म। एतदर्थं द्वाराणां, गवाक्षाणाम् इत्यादीनाम् उचिता व्यवस्था अपि क्रियते स्म। प्राय: प्रत्येकं गृहे अवशिष्टानाम् एकत्रीतकरणं तथा जल–निर्गमनस्य सुविधा अपि आसीत्। गृहस्थ जनानां विभिन्न कार्यस्य सुगमता सम्पन्नतार्थं प्रत्येक गृहे कक्षाणां (शालानां) व्यवस्था क्रियते स्म। गृहस्य भित्ते:उपरि श्वेतसुधालेपनकरणस्य प्रथा आसीत्। तेन कारणेन गृहं धवलवर्णं सुन्दरं दृश्यते स्म। भित्तिनिर्माणे मृत्तिकया सह विशेष प्रकारेण निर्मितं सुधाया: प्रयोग: अपि क्रियते स्म।

नगरेषु सार्वजनिकाय उपयोगाय मन्दिरं, स्तूप:, जलाशय:, उद्यानं, विद्यालयं, सभा–भवनं, विपणं, तथा चिकित्सालय: इत्यादि भवनानां निर्माणं क्रियते स्म।

मुगलानां स्थापत्यप्रेम्ण: इतिहास: अनुपममस्ति। एतेषां रचना अपि स्थपत्यस्य वा वास्तो: दृष्ट्या महत् महत्त्वपूर्णमस्ति, परन्तु एतेषां शासनकाले एतेषां नगराणां ज्यामितीय विन्यास: युगयुगात् प्रतिष्ठितमस्ति तेषां रचना एतादृशा करणीयं सम्भवं न जातम्। प्रतिरक्षा दृष्टया वीथि– मार्गाणां वक्राकारे तथा लघु–लघु मानेन क्रियते स्म। एतत् पूर्वयोजितं वा अनियोजितं निर्मितं जातम्। नगर प्रवेश–स्थाने, मुख्यमार्गस्योपरि, विथी–प्रतोलि प्रवेशनस्य भिन्न स्थाने द्वारनिर्माणं सुरक्षा दृष्ट्या आवश्यकमभवत्। वर्तमान प्राचीन देहली तस्य उत्तमं उदाहरणमस्ति।

मुगलशासनकालस्य सुव्यवस्थितस्य नगरनियोजनस्य उत्तममुदाहरणं **'जयपुर नगरम्'** अस्ति। एतस्य नगरस्य निर्माणं महाराजा जयसिंहः(द्वितीय) ई.स.१७३० तमे वर्हे प्राचीन वास्तुशास्त्रीयग्रन्थानां सिद्धान्तानां तथा तत्कालीनामावश्यकानां समन्वयं नियोजितं कृत्वा निर्मितवान्। ज्यामितीय रूपरेखाधारित निर्मितम् एतत् नगरं मध्यकालीन वास्तुकलायाः सर्वोत्कृष्टम् उदाहरणरूपेण परिकीर्तितम्।

भारतीयवास्तुकलायाः इतिहासस्योपरि संक्षिप्तं दृष्टिपातं क्रियते तदा एतत् सिद्धं भवति यत्– प्राचीनसमये नगर निवेशस्य सिद्धान्ताः आसन् एतेषां ज्यामितीयस्य विन्यासस्य विशेष महत्त्वमासीत्। एतेषां सिद्धान्ताः जनानां शान्तिप्रियतायाः सूचकः अस्ति, यः अल्पकालिकः किं नास्ति? अधिकमात्रायां ग्रामानां स्वस्य स्वाभाविक वृद्धि कारणात् अनियोजिते निवेशने अनियमिताकारः, कदाचित् प्रतिरक्षाहेतुदृष्ट्याऽपि स्वाभाविकवृद्धिः अभवत्।

इदं सत्यमस्ति यत् विश्वे वास्तुकलायाः प्रयोगाणां अस्थिरता अस्ति, तेषामगणितशैल्याः विकासः जातः, किन्तु तासां शैलीनां कस्याः अपि वास्तुविदः किम् प्रयोजनम्? वास्तविकता एतत् अस्ति यत् वास्तुकलायाः कोऽपि न पन्थाः, न शैली अस्ति, अपितु वास्तुकलायाः विकासस्य अवछिन्नः क्रमः अस्ति। अतः वास्तुकलानां शैलीनां विशेषः प्रयोजनं नास्ति। एतत्विषये फैक लायड राइट कथयति– वास्तुकलायाः 'परिधिः अत्र–तत्र गच्छति, परन्तु तस्य केन्द्रं परिवर्तितं न भवति' इति।[१]

---

[1] हिन्दीविश्वकोश,षण्ड–१०–पृ–४४८–४४९

## ५. वास्तुकलायाः उद्भवः विकासश्च –

वास्तुकला कालान्तरे जटिला अभवत्, परन्तु ज्ञान–विज्ञानयोः एतस्याः शाखायाः प्रारम्भः ऋतूनामुग्रता, वन्यपशूनां भयः तथा शत्रूणमाक्रमणात् सुरक्षा प्राप्तिहेतु प्रारम्भिकात् उपायमानात् एव जातम्। मानवसभ्यतायाः इतिहासस्य आरम्भः अपि कदाचित् एतादृशः एव अस्ति।[१]

भारतीयवास्तुकलायाः इतिहासः स्वयं भारतीयसभ्यता एवं संस्कृत्याः इतिहासेऽस्ति। अन्य प्राचीनभारतीय विद्यायाः अनुसारेण वास्तुकलायाः अपि क्रमबद्धः इतिहासः न प्राप्यते। परन्तु तस्य मूलसंकल्पना एवं आधारभूतः उल्लेखः प्राचीनभारतस्य अनेकेषु ग्रन्थेषु प्राप्यते। भारतवर्षे वास्तुकलायाः प्रारम्भस्य विद्वज्जनानां मध्ये मतभेदाः वर्तन्ते परन्तु प्राचीन साहित्यस्य अध्ययने स्पष्टं भवति यत् ज्ञान–विज्ञानस्य एतस्या शाखायाः आरम्भः यदा मानवाः पर्णकुट्याः निर्माणं कृत्वा निवासं कृतवन्तः तदा अभवत्। एतत् अनुमानस्य प्रमाणं मत्स्यपुराणे तथा वायुपुराणे 'पृथिवीसन्निवेश्यादि वर्णनम्' इति रूपेण अवधारणामस्ति यत् संस्कृत्याः उषःकाले बहु सामान्य सरलं जीवनं मानवानामासमिति प्रदर्शितं करोति–

**आयुर्धनानि सौख्यं च पृथौ राज्यं प्रशासति।**
**न दरिद्रस्तदा कश्चिद् रोगी न च पापकृत्।।**
**नोपसर्गभयं किञ्चित् पृथौ राजनि शासति।**
**नित्यं प्रमुदिता लोका दुःखशोकविवर्जिताः।।**

[1] हिन्दीविश्वकोश,षण्ड–१०–पृ–४४९

**धनुष्कोट्या च शैलेन्द्रानुत्सार्या स महाबलः।**

**भुवस्तलं समं चक्रे लिकानां हितकाम्यया।।**

**न पुरग्रामदुर्गाणि न चायुधधरा नराः।**

**क्षयातिशयदुःखं च नार्थशास्त्रस्य चादरः।।**

**धर्मैकवासना लोकाः पृथौ राज्यं प्रशासति।** [१]

उपर्युक्तं वर्णनं पौराणिकशैल्यां भोजराजकृतसमराङ्गणसूत्रधारग्रन्थे निम्नदर्शितरूपेण प्राप्यते।

मानवीयसभ्यतायाः तथा संस्कृत्याः विकासक्रमः युगानुसारं वर्णितोऽस्ति। तेषां भवनस्य आवश्यकता तथा उत्पत्ति प्रक्रमः महदादि–सर्गे वर्णितो वर्तते। तेषां राजा भोजः वर्णयति।

वास्तोः उत्पत्तेः पूर्वं पूर्वपुरूषः स्वस्य अलोकिकसिद्धीनां माध्यमेन सर्वविधं सुन्दरं जीवनं जीवति एतत् अकल्पनियमस्ति। तेषां मनसि विकारस्य उत्पन्नेनं तस्य सर्वा सिद्धिः नष्टा जाता। सः अनेकप्रकारस्य प्राकृतिकं कष्टं प्राप्तवान्। एतेषां कष्टानां निवारणार्थं कृषिकार्यस्य प्रारम्भः जातः तथा स्वस्यावश्यकतानुसारं नगरादिरूपेण विभाजनं, गृहसंरचना इत्यादिनिर्माणं कृतवन्तः। एतादृशं भोजराजस्य मतम् अत्र उद्धृतमस्ति–

**अथ प्राक्कथितादस्माद् भूतसर्गादनन्तरम्।**

**प्रजासीदमरैः सार्धमियं पूर्णजनाकुला।।** [२]

---

[1] मत्स्यपुराणम्, १०.२९–३३

[2] समराङ्गणसूत्रधारः, अ.६.१

अर्थात् पूर्वं कथितं भूतसर्गादेः अनन्तरं कुतयुगे समस्तजनाः देवाः अेकत्रं सुखपूर्वकं सहजीवनं जीवन्ति स्म।

देवानाम् इव मानवानामपि पुण्यश्लोकता, अजरता, अमरता च आसीत्। तस्मिन् युगे सर्वे देवाः मानवाश्च राजप्रासाद सदृशे कल्पद्रुमे निवासमकुर्वन्। कल्पद्रुमः तेषां सर्व मनीषां पूर्णां करोति स्म। तत्र कामदेवस्य मित्रं वसन्त–ऋतुः एव सर्वदा आसीत्। अतः एव दृढस्य आवासगृहस्य आवश्यकता नासीत्। तदा सामाजिकसमानता आसीत्, तत् कारणात् जीवनं शान्तिपूर्णमासीत्। तस्मिन् काले तत्र सर्वेजनाः एकोऽग्रजन्मानः ब्राह्मणाः आसन्। चतुर्वेदानामेकः ऋग्वेदः आसीत्। तस्मिन् समये तत्र खेट–नगर–ग्राम–पुर–क्षेत्र–खलादिकं नास्ति। तथा दंशमशकक्रव्याद्भयमपि नासीत्, न ग्रहादि जन्यदोषाः अपि। कल्पद्रुमाप्तभोगानां च ऐश्वर्यधारिणां कोऽपि स्वामी नासीत्। अर्थात् प्रजाः तथा राज्ञा कोऽपि भेदभावाः नासीत्। पुरा भारत वर्षे अपि तेषां निवसतामिति। बहु कालं सुरैः सह वासं कृतवन्तः तथापि तेषां प्रभावाणां ज्ञातुं न शक्नुवन्तः। फलतः कालान्तरे मानवाः देवानाम् अवज्ञां कुर्वन्ति स्म, सर्वज्ञमेवं सर्वानुभूतिं देवाः अपूज्याः एवं क्षुब्धाः अभवन्। अतः आदाय कल्पद्रुमं निपेतुर्द्यां देवाः देवलोके गतवन्तः। तथा मानवानां द्युलोकगमनशक्तिः, दिव्योभावश्च लुप्तः जातः। कल्पद्रुमानामधो तेषाम् आहारविहार क्रीडाप्रमोदादिसमाप्तं जातम्, तथा क्षुधयाः तृषायाः व्याकुलाः भूत्वा व्याधिपीडिताः भूत्वा प्राणत्राणार्थमेतेषां पर्पटकानां, शस्यादीनामाहारं कुर्वन्ति स्म। तुषधान्योपसेवया एतेषा मलप्रवृत्तिरभवत्। एतेषां प्रकृतिः अपि रजोवृत्तिः एवम् आधि–व्याधियोगेन वशीभूताः जाताः। द्वंद्वानां क्लेशानां प्रादुर्भावः अभवत्। पूर्वकालिकः एकमेव वसन्तादयः ऋतवः कालपर्यया षड् ऋतवः अभवत्।

ततस्तेषामभूद् दोषरोगशोककर्कुलं वपुः, मनश्च कामक्रोधैर्ष्यादैन्यासूयादीनां दूषितमभवत्। आध्यात्मिक दुःखानामतिरिक्तम् आधिदैविकं दुःखं ग्रीष्मकाले, पावसकाले, शरदकाले उपस्थितानां दुःखानामपि कष्टम् उपस्थितं जातम्। व्यालमृगादिजानां प्रादुर्भावकारणात् आधिभौतिकं दुःखानां प्रारम्भमपि जातः। अनेन प्रकारेण आधिदैविकं, आधिभौतिकमेवम् आध्यात्मिकं दुःखत्रयार्त्तास्ते व्यवायाद्याभिगुप्तये, हिमानिलादिवारणाद्यर्थं तेषां प्रथमं वृक्षेषु निवासं कुर्वन्ति स्म। गृहापेक्षा, गृहनिर्माणाय तैरुपायः प्रथमोपायः आसीत्। वृक्षावासैः अप्रितैः कुट्टिमानि गृहाणि निर्माणाय अस्माभिर्वृक्षाणां दुःखार्तचेतसः छेदनारम्भं कृतवन्तः। अतः स्मृत्वा कल्पद्रुमाकारास्तद्रुपाणि एकद्वित्रिचतुःसप्तदशशालानि गृहाणि निर्मितानि। एतानि गृहाणि प्राकारपरिखा तृणादिभिः आच्छादित्वा तत्र गृहमेधिनः ह्यष्टास्तेष्व अन्यत्र जीवनकालपर्यन्तं सुखपूर्वकं निवासमकुर्वन्। इत्यमीषु गृहिणो शीतवातजलतापनादिषु समस्त दुःख–विपत्तीनां निराकरणं कृत्वा चिरकालपर्यन्तं गृहेषु सुखपूर्वकमवसन्। एतादृशां भवननिर्माणस्य प्रारम्भो जातः।[१]

## ६. वास्तुशास्त्रस्य कालक्रमिक विकासः –

### ► वैदिकवाङ्मये वास्तु विचारः —

वैदिकवाङ्मयमेकं विशालं वाङ्मयमस्ति। तेषामन्तर्गतं संहिताब्राह्मणग्रन्थाः आरण्यकग्रन्थाः उपनिषद्वेदाङ्गसूत्रमित्यादि सन्ति, एतेषां स्थापत्यस्य विविधाङ्गानां वर्णनं दृश्यते। संहिता चतस्रः सन्ति ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्च। चतुर्षु वेदेषु विविस्यमानां विषयाणां स्पष्टीकरणार्थं प्राचीनकाले ऋषियः पृथक् पृथक् शास्त्रानां रचनां कृत्वा प्रत्येक विषयाणां विस्तारपूर्वकं विवेचनं कृतवन्तः।

---

[1] समराङ्गणसूत्रधारः, ६.१–३९

ऋग्वेदे 'सुरणं गृहे ते' [१] तथा दाशुषो गृहे[२] अर्थात् गृहशब्दः निवासः इति अर्थः। गृह इति शब्दः अथर्ववेदे **वरुणगृहः** [३] तथा **गृहे वसतु** , ऐतरेय ब्राह्मणग्रन्थे [४] अपि एतादृशः गृहशब्दः प्रयुलः। गृहमिति शब्दस्य ऋग्वेदे अनेके पर्यायशब्दाः उपलब्धाः सन्ति। यथा– गय, धामन्, दम, सदस्, सदनम्, आयतनम्, क्षयम्, ओकस्, निवेशनम्, वेश्मः इत्यादि।

अनेन प्रकारेण यदि वेदानामाधारेण ज्ञातं भवति यत् आर्याः श्रेष्ठमावासीय अवधारणां दृढं कृतवान्तः इति वास्तोष्पतिसूत्रं दर्शयति। प्रत्येकजनाः स्वस्य आवासस्य सर्वाधिकं सुन्दरं, संपन्नं करणार्थं प्रार्थनां कुर्वन्ति। अत्र वास्तोष्पतिशब्दस्य उल्लेखं दृश्यते। यथा–

**वास्तोष्पते प्रति जानीह्यस्मान्स्व वेशो अनमीवो भवा नः।**
**यत् त्वमेहे प्रति तनो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।।**
**वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरन्दो।**
**अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व।।**
**वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या।**
**पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः।।** [५]
**अमीवहा वास्तोष्पते विस्वा रूपाण्यविशन्।**

---

[1] ऋग्वेद, ३.५३.६

[2] ऋग्वेद४.४९.६, ८.१०.१ आदि

[3] अथर्ववेदः, ७.८३.१

[4] ऐतरेय ब्राह्मण, ८.२१ आदि

[5] ऋग्वेद, ७.५४.१–३

**सखा सुशेव एधि नः।।**[१]

वास्तोष्पतिशब्दस्य शाब्दिकार्थः वास्तु(गृह)स्य पतिः(स्वामी) इति । कोशग्रन्थेषु एतस्यार्थः इन्द्र इति दर्शितमस्ति।[२]

डॉ.शुक्लः वास्तोष्पतेः अर्थः भवन–स्थलस्य आराध्य देवता इति दर्शयति।[३] तथा वैदिक संस्कृति ग्रन्थे वास्तोष्पतिशब्दास्यार्थः ईश्वरः एवं प्रधानशिल्पी इति दृश्यते। तेषां गृहे निवसतां द्विपदानामेवं चतुष्पदानां कृते सुख–सौभाग्यादिप्राप्त्यर्थं प्रार्थनां कृतम्।[४] महर्षि दयानन्दः अस्य शब्दस्यार्थः गृहे निवसतां प्रमुखव्यक्तिः वा गृहरक्षकः इति करोति।[५] परन्तु व्यापक दृष्ट्या वास्तोष्पतिशब्दस्यार्थः ईश्वरः एव युक्ति–सङ्गतं प्रतीतं भवति कारणमेषः विश्वब्रह्मरूपः वास्तुः स्वामी अस्ति।

ऋग्वेदे एतादृशाः गृह निर्माण निर्देशः प्राप्यते। यथा–

**तां व वास्तून्यश्मसि गमध्यै यत्र गावो भूरिश्रृङ्गा अयासः।**[६]

अर्थात् गृहे सूर्यरश्मिः बहूमात्रायामागच्छेत् एतादृशां गृहनिर्माणं करणीयम्। इदं स्पष्टं भवति यत् शालायाः वा गृहाणां मुखं प्रायः प्राची दिशायां भवति स्म। शतपथब्राह्मणे 'प्राचीनवंशः हविर्धानमेतद्वै देवानां निष्केवल्यं यत् हविर्धाना उदीची

---

1 ऋग्वेद, ७.५५.१

2 (क) पद्मचन्द्रकोशः, पृ. ३४८

(ख) शब्दार्थभानु, पृ.२८७

(ग) शब्दस्तोममहानिधि, पृ.१०२३

(घ) हिन्दीशब्दसागर, खण्ड–९,पृ.४४४०

3 वास्तुशास्त्रम्, भाग–१, हिन्दू साइन्स ऑफ आर्किटेक्चर, पृ.६८

4 वैदिक संस्कृति, भाग–१,पृ.१०५ एवं १६५

5 ऋग्वेद, १०.५४.१–३ तथा १०.५५.१, हिन्दी भाष्य,पृ.१०९–११–द्रष्टव्य

6 ऋग्वेद, १.१५४.६

वै मनुष्याणां दिक्......।'[१] अर्थात् देवानां पूर्वपश्चिम विन्यासयुक्तभवनमधिकं रुचिकरमासीत्। तथा मनुष्याणां गृहाणि उत्तरदक्षिण विन्यासयुक्त रुचिकरमासीत् इति वर्णनं प्राप्यते।

अथर्ववेदे द्वौ शालासूक्ते स्तः। (वेदेषु शाला शब्दस्यार्थः गृहम् इति। तथा समराङ्गणसूत्रधारग्रन्थे 'गृहमेकं तु यच्छन्नं सर्वं शालेति सा स्मृता।'[२] इति दर्शितमस्ति। ) शाला वा गृहनिर्माण दृष्ट्या अत्यन्तं महत्त्वपूर्णमस्ति। तेषां वैदिककालिक गृहाणां सुन्दरमेवं स्पष्टं चित्रम् उपस्थीतं भवति। तस्मिन् युगे शालासम्बन्धितं वैदिक भावना उन्नतमासीत्। अथर्ववेदे नवमकाण्डे तृतीय सूक्तस्य प्रथम मन्त्रे गृहनिर्माण सम्बन्धित एतादृशाः निर्देशः प्राप्यते यत्–

**उपमितां प्रतिमितामथो परिमितामुत।**

**शालाया विश्ववाराया नद्धानि वि चृतामसि।।**[३]

अर्थात् गृहं सर्वप्रकारेण उत्तममुपमायुक्तं प्रतिकृतिचित्रनिर्माणं कृत्वा उत्तमद्रव्यानाम् उपयोगेन सुन्दरं, सुदृढमनोरमं तथा चित्तविनोदकं निर्मातव्यम्। यथा सर्वदिक् द्वारयुक्तं, सर्वश्रेष्ठं द्रव्ययुक्तं, योग्यप्रतिमानयुक्तं, पुरतो भित्तिः, द्वारः, वातायनादिसमानमानयुक्तं, चतुरस्त्रं परिमाणयुक्तं, काष्ठप्रस्तरादिपदार्थानां दृढसन्धिबन्धनयुक्तं करणीयम्। अथर्ववेदे तृतीयकाण्डे ३१ सूक्तानि सन्ति। तत्र

---

1 शतपथब्राह्मण, ३.६.१.२३,भारतीय कला, पृ.६०

2 समराङ्गणसूत्रधारः, २२.१९

3 अथर्व. ९–३–१

सूक्त १२ शालानिर्माणम् अर्थात् गृहनिर्माणविधानस्य वर्णनं प्राप्यते। द्वादशं सूक्ते नव मन्त्राणि सन्ति। तत्र नूतनशालानिर्माणमेवं प्रवेशविधानस्य वर्णनमपि प्राप्यते । यथा–

**इहैव ध्रुवां नि मिनोमि क्षेमे तिष्ठाति घृतमृक्षमाणा ।**

**तां त्वा शाले सर्ववीराः सुवीरा अरिष्ट उप सं चरेम।।**[१]

अस्माकं गृहं (शाला) दृढं तथा उचितविभागयुक्तं करणीयम्, तत्र योग्यप्रमाणेन वायुः, प्रकाशादिः आगच्छेत् तथा गृहे घृतम् इत्यादि सर्ववस्तूनामुपलब्धि नित्यं भवेत् एवं तस्य सेवनं कृत्वा गृहवासिनः – गृहस्थाः सर्वदा निरोगिनः एवं स्वस्थाः जीवनयापनं कुर्वन्ति इति।

### ▶ब्राह्मणग्रन्थेषु वास्तुविचारः–

ब्राह्मणग्रन्थेषु वास्तुविद्यायाः स्थानं दृश्यते। यत्र शिल्पशब्दस्य प्रयोगः मूर्तिकलायां सङ्गीते च वर्तते। ऋग्वैदिकवास्तुविन्नग्नजित् शतपथ ब्राह्मणे उल्लिखितं यत्र तदीय सिद्धान्तानां खण्डनं प्राप्यते, अयं नारदशिष्यः आसीत्।[२]

एवमेव शतपथब्राह्मणादिषु वास्तुविद्यायाः विवरणं समुपलभ्यते।

### ▶संस्कृतलौकिकसाहित्ये वास्तुविद्या –

---

[1] अथर्व. ३–१२–१

[2] भारतीय स्थापत्य, पृ–२५

**(१) रामायणम् –**

संस्कृतवाङ्मये आदिमं काव्यं रामायणमस्ति। यत्र कतिपयपदानामनुशीलन द्वारा ज्ञायते यत् महाकाव्यकाले वास्तुविद्यायाः उत्कर्षः आसीत्। वाल्मीकिरामायणे दुर्गस्य चत्वारः भेदाः दृश्यन्ते। अपि च वेद्याः देवायतनं यज्ञाशालादीनामुल्लेखो वर्तते।[1] तेषु नगराणि, प्रासादानां विवरणमपि वर्तते। यत्र अयोध्या[2], किष्किन्धा[3], लङ्का[4] इत्यादि नगराणां वर्णने नगरनिर्माणे नगरे दुर्गमेवम् अन्तःपुराणां सुरक्षा हेतुः दृढप्राकारनिर्माणं कर्तव्यमिति दर्शितम्। तथा एतस्मिन् ग्रन्थे स्थपतिः, सूत्रकर्म-विशारदः, तक्षकः तथा वर्धक्यापि शब्दानामुल्लेखो दृश्यते। यथा हि –

**अथ भूमिप्रदेशज्ञाः सूत्रकर्म विशारदाः।**

**स्वकर्मभिरताः शराः खनका यन्त्रकास्तदाः।**

**तथा वर्धकयश्चैव मार्गिणो वृक्षतक्षकाः।।**[5]

**(२)नाट्यशास्त्रम्—**

नाट्यशास्त्रे भरतमुनिः नाट्यमण्डपस्य रचनाविधानस्य नियमाः निर्धारितं कृत्वा तस्य महत्त्वं प्रदर्शयति। अत्र नाट्यशाला वा रङ्गशालायाः सन्निवेश–प्रसङ्गे एव वास्तुकलायाः वर्णनं दृश्यते। यथा – भूमिचयनं, तस्य परिमार्जनं, तस्य विस्तारस्य

---

1 भारतीय वास्तुकला का इतिहास, पृ–४८–४९

2 वाल्मीकि रामायण, बालकाण्ड, सर्ग–५.१०,१३

3 वाल्मीकिरामायण, किष्किन्धाकाण्ड, सर्ग–३३

4 वाल्मीकिरामायण, सुन्दरकाण्ड, सर्ग–२, युद्धकाण्ड, सर्ग–३

5 वाल्मीकिरामायण, अयोध्याकाण्ड, सर्ग–८०.१–२

परिमाण निर्धारणं, नाट्यशालाया: मानचित्रं, शिलान्यासस्य धार्मिकविधि, ब्राह्मणादि चतुर्वर्णानामाधारोपरि चतु:प्रकार: स्तम्भरचना, भित्ति-रचना, द्वारद्वयमुक्त: प्रसाधनप्रकोष्ठ:, रङ्गपीठ: तथा चर्तुस्तम्भानामुपरि आधारितं रङ्गपीठस्य द्वयोपार्श्वे निर्मित प्राग्रीवादि।[१]

**(३) महाभारत** –

महाभारतेऽपि वास्तुविद्याया: प्रकर्ष: रामायणकालात् अधिक: आसीत्।[२] महाभारते इन्द्रप्रस्थनगरस्य सम्बन्धितविवरणं नगरनिर्माणयोजनाया: उत्तममुदाहरणं प्राप्यते।[३] एतस्मिन् ग्रन्थेऽपि षड् प्रकाराणां दुर्गाणामुल्लेख: प्राप्यते।[४] श्रीकृष्णस्य आह्वाने खाण्डववनस्य ज्वलनानन्तरं सुनियिजितं हस्तिनापुरस्य निर्माणं श्रेष्ठतया विश्वकर्मा: विरचितवान्। एष: ग्रन्थे **द्वारका,**[५] **मिथिला**[६] तथा **तरलनगरस्य**[७](फ्लोटिंग सिटि) उल्लेख: प्राप्यते। तथा नगरस्य परितो चतुर्दिक्

---

[1] नाट्यशास्त्रम्, अ.२

[2] भारतीय वास्तुकला का इतिहास, पृ-४८-४९

[3] महाभारत, आदिपर्व, अ.१९९

[4] महाभारत, शान्तिपर्व, अ. ८७.५

[5] महाभारत, आदिपर्व, अ.५७

[6] महाभारत, सभापर्व, वनपर्व

[7] महाभारत, वनपर्व, अ.१७३.३,इण्डियन आर्किटेक्चर ऑक्कार्डिंग टू मानसार शिल्पशास्त्र,पृ-१७ त: उद्धृत।

सुरक्षा हेतु परिखा तथा प्राकारस्य निर्माणमपि क्रियते स्म इति। इन्द्रप्रस्थनगरस्य परितो विद्यमानं विस्तृत परिखाणां तुलना समुद्रेन कृतमस्ति। यथा हि –

**सागर प्रतिरुपाभिः परिखाभिरलङ्कृताम्।**[१]

तदुपरान्त महाभारते सभापर्वान्तर्गतां विभिन्नसभाभवनानां वर्णनमपि प्राप्यते। तेषां इन्द्रसभा, यमसभा, वरुणसभा, कुबेरसभा तथा ब्रह्मसभा उल्लेखनीयाः सन्ति।[२]

संस्कृतस्य अन्यग्रन्थेषु अपि भारतीयवास्तुकलायाः विशदमेवं स्पष्टं वर्णनं दृश्यते। शुद्रक–विरचितमृच्छकटिके वसन्तसेनायाः भवनस्य वर्णनं[३] तथा कालिदास–कृतमेघदूते उज्जयिन्याः[४] तथा अलकापुरीवर्णनं[५] वर्तते। माघकृतशिशुपालवधे द्वारकापुर्याः[६], युधिष्ठिरस्य तथा कृष्णस्य भव्यराजप्रासादस्य भव्यराजप्रासादस्य वर्णने **रत्नस्तम्भेषु**[७] एवं सभाभवनस्य वर्णनं[८] प्राप्यते। बाणभट्टरचिते हर्षचरिते

---

[1] महाभारत, आदिपर्व, अ.१९९२९

[2] महाभारत, सभापर्व, अ.७–११

[3] मृच्छकटिकम्, अङ्क–४

[4] मेघदूतम्, पूर्वमेघ, ३१,३३,३५ आदि

[5] मेघदूतम्, उत्तरमेघ, १,५,८ आदि

[6] शिशुपालवध, सर्ग–३

[7] शिशुपालवध,सर्ग–२.४

[8] शिशुपालवध, सभाभवन–वर्णन, सर्ग–१३.५१–६०

नैकप्रकोष्ठाः[१] कादम्बर्यां दर्शकभवनस्य, तपस्वि–कुटीरस्य, सूतिकागृहस्य सुन्दरं वर्णनं दृश्यते। यथा हि–

**मणिमय–मङ्गलकलशयुगलाशून्येनासक्तबहुपुत्रिकाङ्लकृतेन विविधनवपल्लवनिवहनिरन्तरनिचितेन ........सर्वतो रक्षापुरुषैः परिवृत्तं सूतिकागृहमदर्शत्।**[२]

तथा प्रासादस्य सुन्दरं वर्णनमपि दृश्यते। यथा–

**क्रमेण च यामावस्थितर्ाभः**

**........स्फीतमपि भ्रमन्नग्नलोकं राजकुलं विवेश।**[३]

तथा अन्यभवनानां वर्णनमपि सुन्दरं प्राप्यते। यथा हि –

**भुवनान्तरणीव विविधप्राणिसहस्त्रसङ्कुलानि**

**सप्तकक्षानतरव्यतिक्रम्याभ्यन्तरावस्थितम्।**[४]

**(४) मस्त्यपुराणम्** –

मस्त्यपुराणे स्थापत्यविज्ञानस्य क्रमानुसारं वर्णनं प्राप्तं भवति। वास्तुभूतोद्भव नामके अध्याये वास्तुपुरुषस्य उत्पत्तिः[५], एकाशीतिपदवास्तु–

[1] हर्षचरितम्, उच्छवास–२,५

[2] कादम्बरी, पूर्वभाग(सं. डॉ.श्रीनिवास शास्त्रीः,डॉ.महेशचन्द्रः' भारतीय') पृ–२७५–८०

[3] तथैव, भाग–१, पृ–३३२–५७

[4] तथैव, भाग–१, पृ–३५८

[5] मत्स्यपुराणम्, अ. २५२

भूमिपरीक्षा तथा पददेवता–विन्यासस्य विवरणं प्रदत्तम्।[१] गृहमान–निर्णयाध्याये सर्वतोभद्र, नन्द्यावर्त, वर्धमानादि भवनानामुल्लेखो वर्तते।[२] तस्य वर्णनं स्थापत्यग्रन्थानामतिरिक्तमन्यग्रन्थेषु अपि प्राप्यते। अध्याय–२५५ रुचकः, वज्रः, द्विवज्रः, प्रलीनकः तथा वृत्तः पञ्चानां महास्तम्भानां वर्णनमपि प्राप्यते। एतेषां प्रथमं चतस्त्राः स्तम्भाः नैककोणयुक्ताः निर्मियन्ते। यथा हि –

**रुचकश्चतुरः स्यात्तु अष्टास्त्रो वज्र उच्यते।।**

**द्विवज्रः षोडशास्त्रस्तु द्वात्रिंशास्तः प्रलीनकः।**

**मध्यप्रदेशे च स्तम्भो वृत्तो वृत्त इति स्मृतः।।**[३]

प्रासाद–निर्देशः[४] तथा मण्डपलक्षणादि[५] अध्याये मन्दिरस्थापत्यस्य विस्तृतं वर्णनं विद्यते। तेषां तस्य निर्माणविधानं, परिमाण, तलसंख्या, छदिः इत्यादीनां वर्णनं दृश्यते। तथा भवननिर्माण विधानस्य वर्णनमपि प्राप्यते।[६] तदुपरान्त प्रतिमानिर्माणकलायाः अपि वर्णनं प्राप्तिं भवति।[७]

---

[1] मत्स्यपुराणम्, अ. २५३

[2] मत्स्यपुराणम्, अ. २५४

[3] मत्स्यपुराणम्, अ. २५५.२–३

[4] मत्स्यपुराणम्, अ. २६९

[5] मत्स्यपुराणम्, अ. २७०

[6] मत्स्यपुराणम्, अ. २५७

[7] मत्स्यपुराणम्, अ. २५८,२६३,२९२

भविष्यपुराणे[१], ब्रह्माण्डपुराणे[२], वायुपुराणे[३] तथा नारदपुराणेऽपि[४] एतत् एतत् विषयकवर्णनं समुपलभ्यते।

### (५) अग्निपुराणम् –

पुराणेषु अग्निपुराणस्य स्थानं विशेषमस्ति। आचार्यबलदेवस्य मतानुसारं अग्निपुराणं समस्तभारतीयविद्यानां विश्वकोशः कथितुं शक्यते इति।[५] अग्निपुराणे वास्तुशास्त्रसम्बन्धितं षोडशाध्यायाः सन्ति। वास्तुकलायाः वर्णनमधिकतया न वर्तते अपितु मूर्ति–कलायाः अधिकं वर्तते। एतस्मिन् पुराणे नगरनिवेशने नगरस्य विस्तारः, तस्य प्रशस्ताकारः, नगरस्यावश्यकानि अङ्गानि प्राकारः, द्वारादिनामुल्लेखो तथा तत्रे विभिन्नवर्णानां तथा व्यवसायजीविनां योग्य–स्थान निवासादिनां वर्णनं प्रतिपादितमस्ति।[६] अत्र नगरे देवालयादीनां निर्माणविधानं प्रासादलक्षणं कथनं[७] नामकाध्याये तथा सामान्य–प्रासादलक्षणं[८] नामकाध्याये वर्तते। अन्य १३ अध्यायेषु मूर्तिरचनाकलायाः विवेचनं प्रतिपादितमस्ति।

---

[1] भविष्यपुराणम्, मध्यपर्व,अ.१२,ब्रह्मपर्व, अ.१३०–१३२

[2] ब्रह्माण्डपुराणम्, अ.७

[3] वायुपुराणम्, भाग–१,अ.३९

[4] वायुपुराणम्, भाग–१, अ.१३

[5] पुराणविमर्श, पृ–१५१

[6] अग्निपुराणम्, अ.१०६

[7] अग्निपुराणम्, अ.४२

[8] अग्निपुराणम्, अ.१०४

**(६)गरुडपुराणम् -**

गरुडपुराणस्य स्थापत्यक्षेत्रे महत्त्वपूर्णं योगदनमस्ति। तत्र अध्यायद्वयोर्मध्ये वाास्तुकलासम्बन्धितविषयाणां प्रतिपादनं दृश्यते। तेषां सर्वप्रमुखाः विषयाः– राजप्रासादः, दुर्गः, उद्यानं, मन्दिरं, मठः, आवासीयभवनं, सैनिकभवनं, धार्मिकभवनमित्यादीनां वर्णनं प्राप्यते।[१] तेषां मूलमेवं मानाधारे विभिन्न प्रासादानां वैराजः, पुष्पकः, कैलासः, मालिका, तथा त्रिविष्टपमेते पञ्चवर्गेषु विभाजनं वर्तते। यथा हि –

**प्रासादानाञ्च वक्ष्यामि मानं योनिञ्च मानतः।**
**वैराजः पुष्पकाख्यश्च कैलासो मालिकाह्वयः।**
**त्रिविष्टपञ्च पञ्चैते प्रासादाः सर्वयोनयः।।**[२]

तथा एतेभ्यः चत्वारिंशत् प्रासादानां सम्भूतमपि दर्शितम्। यथोक्तम् –

**एतेभ्यः सम्भूताः प्रासादाः सुमनोहराः।**
**सर्वप्रकृतिभूतभ्यश्चत्वारिंशच्च एव च।।**[३]

---

[1] गरुडपुराणम् , अ.४६–४७

[2] गरुडपुराणम् , अ.४७.१९

[3] गरुडपुराणम्, अ.४७.२१

**(७)स्कन्दपुराणम् –**

स्कन्दपुराणमपि एकं प्रारम्भिकं पुराणं मन्यते। एतत् अत्यन्तं विशालं पुराणमस्ति। तत्र वास्तुकलासम्बन्धितं त्रयः अध्यायाः सन्ति। एकस्मिन् अध्याये नगरनिर्माणस्य विस्तृतं वर्णनं वर्तते। यथा हि –

**स्वयं विश्वकर्मद्वारा निर्मापितमहीनगरस्थापनवर्णनम्।** [१]

वैष्णवखण्डस्य अध्याय–२५ तथा माहेश्वरखण्डस्य अध्याय–२४ स्वर्णिमप्रधानकक्षः, रथः तथा कल्याणमण्डपानां निर्माणविधानस्य वर्णनं प्राप्यते।

**(८)विष्णुधर्मोत्तरपुराणम् –**

विष्णुधर्मोत्तरपुराणस्य स्थापत्यकला, मूर्तिकला एवं चित्रकलायाः कोषग्रन्थः कथितुं शक्यते। एतत् पुराणे ४३ अध्यायेषु वास्तुकला, मूर्तिकला तथा चित्रकलायाः वर्णनं प्राप्यते। एतत् पुराणे मानवगृहाणां तथा देवगृहाणां रचनाविधानस्य निरूपणं दृश्यते। एतेषां षड्प्रकाराणि दुर्गाणि, तस्य परितो परिखा, देवालयः, राजप्रसादः,राजमार्गः,विभिन्न कर्मोपजीविनाम् आपणविपणानां तथा भवनानां वर्णनं कृतमस्ति। अध्याय–२९ गृहनिर्माणार्थमुपयुक्तभूमिचयनं पुष्पदीपकस्य तथा जलपरीक्षायाः वर्णनं वर्तते। यथा हि –

**गर्भे च कुसुमं यस्यां नम्लानिमुपगच्छति।**

**न निर्वाणमाप्नोति यस्यां दीपश्च भर्गव।।**

[1] स्कन्दपुराणम् , महेश्वर–खण्ड, भा.२,अ.२५

**उदकं च तथा यस्यां शीघ्रं राम न जीर्यते।**

**सा प्रशस्ता क्षितिस्तस्यां निवेशं कारयेद्बुधः।।** [१]

तथा नगरनिर्माणं यथा –

**चतुःषष्टिपदं कृत्वा वास्तुपूर्वं यथाविधि।**

**चतुःषष्टिविभागेन कल्पयित्वा समन्ततः।।** [२]

चतु:षष्टिवास्तुपदमण्डलाधारेण नगरस्य निर्माणं विन्यासश्च कथं करणीयमिति दर्शितम्। तथा एतस्य अध्याय–३० वृक्षाणां वपनस्य नियमानां एल्लेखो वर्तते, गृहस्य वामे उद्यान–रचनायाः निर्देशमपि वर्तते। यथा हि –

**वामभागे तथद्यानं कुर्याद्वासगृहाच्छुभम्।** [३]

चित्रकला वास्तुकलायाः एकमङ्गमस्ति। अतः विष्णुधर्मोत्तरपुराणे चित्रकलायाः वर्णनमपि प्राप्यते। [४]

**(९)अर्थशास्त्रे वास्तुविद्या –**

कौटिलीयअर्थशास्त्रे प्राचीनभारतीय स्थापत्यकला सम्बन्धितं महत्त्वपूर्णं वर्णनं प्राप्यन्ते। एतस्मिन् ग्रन्थे प्रदत्त वास्तोः वैज्ञानिकया परिभाषया स्पष्टं भवति यत् कौटिल्यसमये वास्तुविद्या अत्यन्तं विकसिता आसीत्। यथा–

**गृहं क्षेत्रमारामः सेतुबन्धस्तटाकमाधारो वा वास्तु।** [१]

---

[1] विष्णुधर्मोत्तरपुराणम् ,खण्ड–२,अ.२९.६–७

[2] विष्णुधर्मोत्तरपुराणम् ,खण्ड–२,अ.२९.१२

[3] विष्णुधर्मोत्तरपुराणम्, खण्ड–२,अ.३०.३

[4] विष्णुधर्मोत्तरपुराणम्, खण्ड–२,अ.३०

एतावत् वर्णनं दृश्यते। अर्थशास्त्रे वास्तुविद्यायाः सिद्धान्तानां दिग्दर्शनं भवति। अर्थशास्त्रे भवनद्वाराणां संज्ञा देवसम्बन्धिता अस्ति।। अपि च पारिभाषिकाभिः ज्ञानमपि भवति।[2]

स्थानीयनगराणां निर्माणं विशेषयोजानाधारे क्रियते स्म। अर्थशास्त्रे नगरनिर्माणार्थं प्रशस्तभूम्याः दर्शनप्रसङ्गे आचार्यः कौटिल्यः वर्णयति। यत् –

**वास्तुकप्रशस्ते देशे नदीसङ्गमे ह्रदयस्य**

**विशोषस्याङ्गे सरसस्तटाकस्य वा वृत्तं दीर्धं चतुसश्रं वा .....।**[3]

**(१०) बृहत्संहितायां वास्तुविद्या –**

त्रिस्कन्धात्मकं ज्योतिषशास्त्रीयसंहितास्कन्धग्रन्थेषु वराहमिहिर–रचितबृहत्संहितायाः उत्कृष्टं स्थानं वर्तते। एषः ग्रन्थः खगोलविद्यायाः अस्ति, परन्तु तत्र वास्तुविद्यास्थापत्यविद्यायाः अपि वैज्ञानिकं प्रतिपादनमास्ति। अत्र वास्तुविद्याध्याये वास्तुचयनं, भूमिपरीक्षा, वृक्षारोपणं, वास्तुस्थापनादीनां विवेचनमपि दृश्यते। तस्य अध्याय–५६ विशंतिः लक्षणानि प्रासादस्य प्राप्यन्ते। देवालयभूमिः कीदृशी भवतु गर्भद्वारं कथं स्यात्, प्रतिमा कथं भवितव्या इत्यादीनां विवरणमत्र प्राप्यते। अत्र वज्रलेपलक्षणं, शयनासनलक्षणं, प्रतिमालक्षणादीनां निरुपणमपि प्रतिपादितमस्ति।

---

[1] अर्थशास्त्रम्, अधिकरण–३,अ.८

[2] भारतीय स्थापत्य, पृ–२५

[3] अर्थशास्त्रम्, अधिकरण–२,अ.३

बृहत्संहिताद्वारा वास्तुशास्त्रस्य सप्त संख्यकानाम् आचार्याणां ज्ञानं लभ्यते। तेषां नाम्नां अग्रे विवरणं भविष्यति। बृहत्संहिता वास्तुविद्यायाः अपूर्वः ग्रन्थः अस्ति इति मन्यन्ते।

धन्योऽयं वराहमिहिरो यस्य ज्योतिप्रभा अद्यापि ज्योतिर्जगति न केवलं भारतेऽपि तु समग्रेऽपि विश्वे तथैव प्रभासते यथा सार्धसहस्त्रमिते पूर्वे चमत्कृतासीत्। अप्रतिमस्यास्य महापण्डितस्य विद्वत्ता खगोलशास्त्रे, भौतिकज्योतिषशास्त्रे, वास्तुशास्त्रे अन्यान्येषु च लौकिकोपयोगिविषयेषु यथा दृश्यते तथा तु न ततः पूर्वं पाश्चाद् वा। अस्य कवित्वशक्तिः, वैज्ञानिकं च खगोलीयज्ञानं भारतीयशास्त्राणां परिशीलनम्। विषयानुकूल भावोपस्थाने दक्षता लेखकीयसिद्धता बृहत्संहितायाम् अपूर्वा एव विद्यते अस्मिन् ग्रन्थे वराहमिहेरेण समीचीनतया वास्तुविषये विवेचनं कृतं वर्तते।

**(११)शुक्रनीतिः –**

यद्यपि शुक्रनीतिः मुख्यतः राजनीति विषयकः प्रख्यातः महत्त्वपूर्णः च ग्रन्थः अस्ति। तथापि अत्र स्थपत्यकलाविषयकं वर्णनं दृश्यते। अत्र ग्रन्थे आचार्यः शुक्रः राजधानीनगरस्य वर्णनं करोति तेषामाधारेण कथितुं शक्यते यत् तत्कालीके भारतवर्षे भौतिकसभ्यता अतीवोन्नतावस्थायामासीत्। अत्र राजधानीनगरस्य सन्निवेशने उपयुक्तभूमौ प्राकृतिकस्य सौन्दर्यस्य महत्त्वस्य प्रतिपादनं कृत्वा नानाप्रकारणां वृक्षाणां तथा नदीतीरस्य प्रदेशस्य उल्लेखो वर्तते।[१] अत्र राजधानीनगरस्याकारः,

---

[1] शुक्रनीति, अ.१.२१३–१४

आवश्यकाङ्गानि प्राकारः, परिखा, राजसभाभवनं, मार्गाः, उद्यानमुपवनं, धर्मशाला इत्यादीनां तथा राजप्रसादस्य निर्माणविधानं, गोशाला, अश्वशाला आदीनां वर्णनं प्राप्यते।[१] अत्रे प्रतिमारचनाविधानस्य सूक्ष्मतया विवेचनमपि वर्तते।[२]

**(१२)अष्टाध्यायीग्रन्थे –**

पाणिनिप्रणितव्याकरणग्रन्थः अष्टाध्यायी अस्ति। स्थापत्यकलायाः उत्तमः ग्रन्थः अस्ति। तत्र कापिशी, तक्षशिला, हस्तिनापुरम्, सङ्काश्यम्, कम्पिल्यम् आदीनां नैक प्रमुखनगराणामुल्लेखो मिलति।[३] अत्र एतत् स्पष्टं भवति यत् पाणिनेः समयपर्यन्तं स्थापत्यकलायाः तथा नगरयोजनायाः विकासः पर्याप्तरूपेण अभवत्। नगरनिवेशनं पूर्वं वप्र, प्राकार, नगरद्वारं तथा राजप्रासादः आदीनां सन्निवेशस्थानस्योपरि चिन्हानि क्रियन्ते स्म। एतस्य नगरमापनम् इति संज्ञेन ज्ञायते।[४] मार्गाणां कृते पाणिनिः **सञ्चर** इति शब्दप्रयोगं करोति।[५]

**(१३)पालिसाहित्येषु वास्तुविधानम् –**

विद्वद्जनाः जातकयुगः ई.पू. द्वितीय वा तृतीय शताब्दी मन्यन्ते। तस्य युगस्य स्थापत्यस्य विविधस्वरूपाणामुल्लेखः प्राप्यते एतेषां भग्नावशेषाः अद्यापि उपलब्धाः सन्ति। एतेषां नामाधारेण स्पष्टं भवति यत् तस्मिन् युगे अपि स्थापत्यकला

---

1 शुक्रनीति, अ.१.२१५–२२

2 शुक्रनीति, अ.४.७१–१२८,१३५–२०५

4 पाणिनिकालीन भारतवर्ष, पृ–१४२

5 अष्टाध्यायी, ३.३.११९

उन्नतावस्थायामासीत्। पालिदीधनिकाये वर्णितं २५ शिल्पिनां सूच्याः उल्लेखं कृत्वा आचार्य वासुदेवशरणः अग्रवालः वत्थु–विज्जा(वास्तुविद्या), वत्थु–कम्म(वास्तुकर्म), वत्थु–परिकम्म(वास्तुपरिकर्म) इत्यादी नां विवेचनं करोति।[१]

नगरनिवेशन सम्बन्धितेऽन्ये वास्तुशास्त्रीयग्रन्थे परम्परा वर्णनं प्राप्यते यथा हि वर्णनं पालि–साहित्येऽपि अर्थात् नगरस्य प्रमुखाङ्गानि परिखा, प्राकार, द्वारम्, अट्टालकः, प्रासादः, गृहाणि, देवतायतनम्, आपणम्, उद्यानं, पुष्करिणी, आरामादीनां वर्णनं प्रतिपादितमस्ति। दीधनिकायस्य मधुसुदस्सन सुते पौराणिकः राजा चक्रवर्ती महासुदस्सनस्य प्रासादस्य वर्णने चतुर्धा इष्टिकाः, ८४००० स्तम्भाः, २४ सोपानानि तथा ८५००० प्रकोष्ठानामोल्लेखो प्राप्यते।[२]

महाउम्मग जातके गङ्गातटे एकं नगरनिर्माणस्योल्लेखो मिलति। यथा हि–

**यथा परिछत्रके स्थानं नगरं मापेतुं अरभि .....गंगातित्थे अहोसि।**[३]

**(१४)आगम –**

आगमग्रन्थः वास्तुकला एवं मूर्तिकला सम्बन्धितं पारिभाषिकं ज्ञानेन परिपूर्णमास्ति। गोपीनाथ रावस्य मतानुसारम् अष्टमी एवं नवमी शताब्द्याम् आगम–साहित्यस्य विशेषः प्रचारः आसीत्।[४]

---

[1] भारतीय कला, पृ–७७

[2] प्राचीन भारतीय कला एवं वास्तु, पृ–७१

[3] जातक, भा.६,पृ–४३१

[4] रुपमण्डनम्, भूमिका, पृ–४ तः उद्धृतम्।

शैवागमानां संख्या ९२ सन्ति। तेषां केचित् आगमाः वास्तुकला सम्बन्धिताः ग्रन्थाः सन्ति। सामान्यतया एकः शैवागमे चर्तुपादाः सन्ति– ज्ञानपादः, योगपादः, चर्यापादः तथा क्रियापादः। तेषां क्रियापादे अन्य विषायाणांमतिरिक्तं वास्तुकलायाः एवं मूर्तिरचना–कलायाः प्रतिपादनमपि वर्तते। कामिकागमे कुल ७५ अध्यायाः सन्ति तेषु ६२ अध्यायेषु वास्तु एवं मूर्तिकलायाः वर्णनं वर्तन्ते। डॉ.पी.के. आचार्यवर्यानामनुसारं एतस्मिन् ग्रन्थे वास्तुकलायाः वर्णनमन्यग्रन्थानामपेक्षया अधिकमस्ति।[१]

कामिकागमानुसारं कारणागमेऽपि अध्याय तृतीयतः अष्टमाध्यायपर्यन्तम् अर्थात् षड् अध्यायेषु वास्तुकला–विषयकविधानस्य वर्णनं प्राप्यते। यथा वास्तुविन्यासविदानम्, आद्येष्टकाविधिः, अधिष्ठानविधिः, गर्भन्यासविधिः, प्रासादलक्षणविधिः तथा प्राकारलक्षणविधिः तदुपरान्त लिङ्गलक्षणविधिः एवं प्रतिमालक्षणविधिः इत्यादिः विविध देव–देवीनां प्रतिमानिमार्णविधानस्य उल्लेखो अपि दृश्यते।[२]

**(१५)तन्त्रम्** –

तन्त्रसाहित्यमपि प्राचीनं साहित्यं मन्यते। अत्र शिल्पसम्बन्धितं चर्चा वर्तते। अग्निपुराणे परिगणितानि पञ्चविंशतिः (२५) तन्त्राणामुल्लखो दृश्यते। हयशीर्ष–

---

[1] वास्तुशास्त्रम्, भा.१, हिन्दू सायन्स ऑफ आर्किटेक्चर, पृ–८० तः उद्धृतम्।

[2] स्वतन्त्रकलाशास्त्र, पृ–६००

पञ्चरात्रमेवं अत्रिसंहितायां प्रतिपादितं विषया: तन्त्रसंस्कृते: उपरि आधारिता: सन्ति तथा धार्मिकस्थापत्यमर्थात् मन्दिरमेवं मूर्तिनिर्माणकलाया: सम्बन्धितमस्ति।

**(१६)सूत्रबौधकालिकवास्तुविचार: -**

वास्तुविद्याया: प्राथमिको विकास: सूत्रकालादेव प्रारम्भते। अस्मिन् काले भारतीय वास्तुविद्याया: स्वरूप: स्थिरत्वं गतमिति।

ऐतिहासिकानुशीलन द्वारा ज्ञायते यत् तस्मिन् काले वास्तुनियमानां प्रारम्भ: अभूत्। यद्यपि सूत्रकालिक वास्तुग्रन्थ: नास्तिसुलभ:। तथा पि गृह्यसूत्रेषु मण्डपादि निर्माणनियमानामोल्लेखो दृश्यते। आश्वलायनगृह्यसूत्रे आवासयोग्यसभूमि: उर्वरा भवेत् सा हि छिद्र रहिता दोषरहिता स्यात् तत्र कुशकाशादीनामुत्पत्ति: प्रभूता स्यात्। तत्र कण्टकयुक्त वृक्षाणां स्थानं न स्यात्। परिखाया: निर्माणमपि भवेत्। तथा हि–

अनूषरमविचदिष्णु भूमौषधिवनस्पतिवत्। यस्मिन् कुशवीरणं प्रभूतम्। कण्टकिक्षीरिणस्तु समूलान् परिखायोद्वासयेदपामार्ग: शाकस्तिल्वक: परिव्याध इति चैतानि। यत्र सर्वत आपो मध्य समेत्य प्रदक्षिणं शयनीयं परीत्य प्राच्य: स्यन्देनन्नप्रवदत्यस्तत्सर्वसमर्द्धम्। समवस्त्रवे भक्तशरणं कारयेत्। वह्वन्नं हि भवति। दक्षिणाप्रवणे सभां मापयेत्साद्यूता हि भवति। युवानस्तस्यां कितवा: कलहिन: प्रमायुका भवन्ति। यत्र सर्वत आप: प्रस्यन्देरन् सा स्वस्त्यन्यद्यूता च। [१]

पारस्करगृह्यसूत्रस्य तृतीयकाण्डे शालानियोजनस्य विचार: दृश्यते। अत्र वास्तुनाम्ना एव शालाकर्म वर्णितमस्ति। तथा हि –

**अथात: शालाकर्म। पुण्याहे शालां कारयेत्।।** [२]

---

[1] आश्वलायनगृह्यसूत्रम् , २.७

[2] पारस्करगृह्यसूत्रम्, ३.४.१–२

अस्य विवरणं हरिहरभाष्ये इत्थं वर्तते –

**शालाकर्म शालाया गृहस्य क्रिया व्याख्यास्यते इति सूत्रशेषे। पुण्यं शुभं पलमासबालवृद्धास्तमितगुर्वादित्यसिंहस्थगुरु क्षयमासादिनष्त्रय-हक्रूरग्रहाक्रान्तनक्षत्रादिदोषरहितं ज्योतिः शास्त्रादिनोक्त गृहारम्भ विहितमासपक्षतिथिवारनक्षत्रयोगकरणमुहूर्त चन्द्रताराबललग्नादिगुणान्वितम् अहः पुण्याहं तस्मिन्पुण्याहे शालां गृहं कारयेत् निर्मापयीत। पुनः पुण्याहग्रहणमुदगयनशुक्लपक्षयोर नियमार्थं शालां कारयेदित्युक्तं तच्च शालाकरणं देशमन्तरेण न सम्भवति इति सामान्यतो देशे प्राप्ते 'यन्नाम्रातं स्वशाखायां पारक्यमविरोधियत्। विद्विद्भिस्तदनुष्ठे यमग्निहोत्रादिकर्मवत्' इति वचनात् पारस्कराचार्येणानुक्तमपि गोभिलगृहसूत्रोक्तदेशे विशेषं अविरोधात् अपेक्षितत्वाच्चात्र लिखामः।** [१]

गृह्यसूत्रेषु एवमेव विचारः दृश्यते यदि अत्र विमर्शः क्रियते तर्हि एतादृशानां शालानां निर्माणाय, शिल्पकारादीनामुत्तरदायित्वमासीत्।

बौद्ध ग्रन्थेषु शिल्पकारस्य पर्यायः **वढकी** [२] उच्यते। इदं पदं संस्कृतसाहित्यस्य वर्धकि पदस्य तद्भवत्वं स्वीकरोति। मिलिन्दपञ्हो नामके ग्रन्थे वर्धक्याः वर्णनं वर्तते। पालि जातकानां परिशीलने न वास्तुविद्यायाः स्वरूपं

---

[1] हरिहरभाष्यपारस्करगृह्यसूत्रम्, पृ–२००

[2] मिलिन्दपञ्हो, अनुमानवग्गो–४,पृ–३७२

सम्यक्त्या प्रतीयते। बौद्धसाहित्येषु स्थापत्यविद्यायाः कलापाश्य बाहुल्यं इतस्ततः प्रायशो दृश्यते। स्वयं बुद्धोनापि स्थापत्यविद्यायाः प्रवचनं कृतम्।

नगरवर्धकिः आदौ एतादृशं स्थानम् अन्वेषणं करोति स्म। यत्र उच्चावच्चं पाषाणसम्पृक्तं लघुपाषाणयुक्तश्च वातावरणं रमणीयं भवेत्।[१]

यदि निवासयोग्या भूमिः न मिलति स्म तदा जनः तस्मिन् वासे निवासयोग्यत्वं सम्पादयति स्म। तत्र परिवारादीनां उद्यानस्य च राजमार्गस्य स्वच्छतायाः प्राशस्त्यं भवतु। यत्र देवस्थानादीनामपि कल्पना स्यात्।[२] तथा–

**सो तास्मिं नगरे सब्बथा वेपुल्लतं पत्ते अञ्ञं देशं उपगच्छेय्य।**[३]

अर्थात् एतदृश्यस्य नगरस्य दोषं दूरीकृत्य नगरवर्धकिः अन्यत्र गच्छति स्म।

एतावत् ज्ञायते यद् नागरिकः नगरवर्धकिम् आहूय समुचितं भवनं निर्मापयति स्म। यत्र वास्तुशास्त्रस्य परिचायिकमद्यत्वे स्वीकरोति। बौद्धकालीक भारतवर्षे वास्तुविद्यायाः विकासो पूर्णतः प्राप्तोऽस्ति।

## ७. वास्तुशास्त्रस्यप्रवर्तकाचार्याः–

पुराणादि प्राचीनेषु ग्रन्थेषु सङ्कलितानां वास्तुशास्त्रोपदेशकानां विस्तृतं सूच्यां वास्तुशास्त्रस्य प्राचीनता स्वयं सिद्धं प्रदर्शितं भवति। अत्र मस्त्यपुराणम्, अग्निपुराणम्, बृहत्संहिता, मानसार, सनत्कुमारवास्तुशास्त्रम् तथा

---

[1] मिलिन्दपञ्हो, अनुमानवग्गो–४

[2] मिलिन्दपञ्हो, अनुमानवग्गो–४

[3] मिलिन्दपञ्हो, अनुमानवग्गो–४

विश्वकर्मावास्तुशास्त्रम् इत्यादिषु ग्रन्थेषु प्रदत्त वास्तुविद्याचार्यानां उल्लेखं निम्नदर्शितमस्ति। यथा–

मस्त्यपुराणानुसारं शिल्पशास्त्रोपदेका: निम्नदर्शितमस्ति।

मत्स्यपुराणे शिल्पशास्त्रोपदेशका: अष्टादश(१८) आचार्या: परिगणिता:। यथा–

**भृगुरत्रीर्वशिष्ठश्च विश्वकर्मा मयस्तथा।**

**नारदो नग्नजिच्चैव विशालाक्ष: पुरन्दर:।।**

**ब्रह्मा कुमारन्नन्दीश: शौनको गर्ग एव च ।**

**वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती:।।**

**अष्टादशैते विख्याता: शिल्पशास्त्रोपदेशका:।।** [१]

अर्थात् वास्तुशास्त्रप्रवर्तका: निम्नदर्शिता: अष्टादशाचार्या: समभवन् –

(१) भृगु:

(२) अत्रि:

(३) वशिष्ठ:

(४) विश्वकर्मा:

(५) मय:

(६) नारद:

(७) नग्नजित्

(८) विशालाक्ष:

---

[1] मत्स्यपुराणम्, अ. २५२. २–४

(९) कुमारः

(१०) नन्दिशः

(११) शौनकः

(१२) गर्गः

(१३) वासुदेवः

(१४) अनिरुद्धः

(१५) शुक्रः

(१६) ब्रृहस्पतिः

तदुपरान्त बृहत्संहितायां सप्त (७) आचार्याः, दर्शिताः। तथा

अग्निपुराणे दर्शिताः वास्तुप्रवर्तकाचार्याः। यथा –

अग्निपुराणे पञ्चविशंति(२५) वास्त्वाचार्यानां परिगणनां दृश्यते–

**व्यस्तानि मुनिभिर्लोके पञ्चविंशतिसङ्ख्या।**

**हयशीर्षं तन्त्रमाद्यं तन्त्रं त्रैलोक्यमोहनम्।।**

**वैभवं पौष्करं तन्त्रं प्रह्लादङ्गार्ग्यगालवम्।**

**नारदीयञ्च सम्प्रश्नं शाण्डिल्यं वैश्वकं तथा।।**

**सत्योक्तं तन्त्रं वासिष्ठं ज्ञानसागरम्।**

**स्वायम्भुवं कापिलञ्चतार्क्षं नारायणीयकम्।।**

**आत्रेयं नारसिंहाख्यामानन्दाख्यं तथारुणम्।**

**बौधायनं तथार्थं तु विश्वोक्तं तस्य सारतः।।** [१]

(१)हयशीर्षः (हयशीर्ष–तन्त्रम्)

(१) त्रिलोकमोहनः(त्रैलोक्यमोहन–तन्त्रम्)

(२) विभवः (वैभव–तन्त्रम्)

(३) पुष्करः(पौष्कर–तन्त्रम्)

(४) प्रह्लादः(प्रह्लाद–तन्त्रम्)

(५) गर्गः (गार्ग्य–तन्त्रम्)

(६) गालवः

(७) नारदः ( नारदीय–तन्त्रम्)

(८) सम्प्रश्न

(९) शाण्डिलः (शाण्डिल–तन्त्रम्)

(१०)विश्वकः (वैश्वक–तन्त्रम्)

(११)सत्यः( सात्य–तन्त्रम्)

(१२)शुनकः ( शौनक–तन्त्रम्)

(१३)वशिष्ठः ( वशिष्ठ–तन्त्रम्)

(१४)ज्ञानसागरः

(१५)स्वयम्भू (स्वायम्भुव–तन्त्रम्)

(१६)कपिल (कापिल–तन्त्रम्)

---

[1] अग्निपुराणम्,

(१७) ताक्ष्र्य

(१८) नारायण: (नारायणिका–तन्त्रम्)

(१९) अत्रि:(आत्रेय–तन्त्रम्)

(२०) नरसिंह:(नारसिंह–तन्त्रम्)

(२१) आनन्द:

(२२) अरुण: (आरुण–तन्त्रम्)

(२३) बौद्धायन:

(२५)ऋषि:(आर्ष:)

बृहत्संहिताग्रन्थे परिगणिता: आचार्या:। यथा –

बृहत्संहिताग्रन्थे सप्त (७) वास्तुआचार्यानां उल्लेखं वर्तते–

(१) वसिष्ठ:

(२) गर्ग:

(३) पराशर:

(४) कश्यप:

(५) विश्वकर्मा

(६) मय:

(७) मनु: आदि।

मानसार ग्रन्थानुसारेण शिल्पाचार्या:। यथा–

मानसारग्रन्थे ३२ शिल्पाचार्याणां नामानि दृश्यन्ते।

**विश्वकर्मा च विश्वेच(शः)विश्वसारं(रः) प्रबोधकः।**

**वृतश्चैव मयश्चैव त्वष्टा चैव मर्नुनलः।।**

**मानविन्मानकल्पश्च मानसारो बहुश्रुतः।**

**प्रष्टा च मानबोधश्च विश्वबोधो ना (न) यश्च तथा।।**

**आदिसारो विशालश्च विश्वकाश्यप ए(श्चै) व च।**

**वास्तुबोधो महातन्त्रो वास्तुविद्यापतिस्तथा।।**

**पाराशरीयकश्चैव कालयूपो महात्रऋषिः(हर्षिश्च)।**

**चैत्याख्यः चित्रकः आ(श्चा) वर्यः साधकसारसंहितः।।**

**भानुश्चैन्द्रश्च लोकज्ञः सौराख्यः शिल्पिवितमः।**

**तदेव(ते एव) ऋषयः प्रोक्ता द्वात्रिंशतिः संख्यया।।** [१]

अर्थात्–

(१) विश्वकर्मा

(२) विश्वेशः

(३) विश्वसारः

(४) प्रबोधकः

(५) वृतः

(६) मयः

(७) त्वष्टाः

(८) मनु

---

[1] मानसारः, अ. ६८.५–९

(९) नलः

(१०) मानवित्

(११) मानकल्पः

(१२) मानसारः

(१३) प्रष्टाः

(१४) मानबोधः

(१५) विश्वबोधः

(१६) नयः

(१७) आदिसारः

(१८) विशालः

(१९) विश्वकाश्यपः

(२०) वास्तुबोधः

(२१) महातन्त्रः

(२२) वास्तुविद्यापतिः

(२३) पाराशरीयकः

(२४) कालयूपः

(२५) चैत्यः

(२६) चित्रकः

(२७) आवर्यः

(२८) साधकसासहितः

(२९) भानु

(३०) इन्द्रः

(३१) लोकज्ञः

(३२) सौरः।

वास्तुशास्त्रप्रवर्तकाचार्यानां परिचयो संक्षेपेण निम्नदर्शितेन प्राप्यन्ते। यथा हि –

**विश्वकर्मा :-**

विश्वकर्मा वास्तुशास्त्रस्य प्रमुखः उद्धावकः एवं वास्तुदेवतारूपेण सर्वाधिक प्रसिद्धः आसीत्। विश्वकर्माः देवस्थपति वा देववास्तु प्रवर्तकः मन्यते। ऋग्वेदे द्वे सूक्ते विश्वकर्मणस्य विस्तृतं विवेचनं प्राप्यते।[१] अस्य द्वे सूक्ते ऋषिः विश्वकर्मा भौवनः तथा देवता विश्वकर्माः अस्ति। वस्तुतः अत्रे सर्वशक्तिमान् परमात्मा परमेष्ठि तथा त्वष्टारूपेण सूचितार्थं विश्वकर्मा शब्दस्य प्रयोगः अस्ति। ऋग्वेदे तस्य –ऋग्वेदे 'परो दिवा पर एना पृथिव्या।'[२] अर्थात् एषः महान् आकाशः एवं पृथिव्याः परः अस्ति । तथा 'अजस्य नाभौ..।'[३] इति दर्शितम्। यजुर्वेदे अपि 'सा विश्वायुः सा विश्वकर्मा सा विश्ववधायाः।'[४] इति विश्वकर्मणस्य उल्लेखो वर्तते। मानसार ग्रन्थे 'स

---

[1] ऋग्वेद, १०.८१,८२

[2] ऋग्वेद, १०,८२.५

[3] ऋग्वेद, १०,८२.६

[4] यजुर्वेद, १.४; १७.२४; १७.३२; १७.७; ७९ आदि।

एवायं सा विश्वकर्मा ब्रह्माण्डं सृजते महु:।'[१] अर्थात् विश्वकर्मणः ब्रह्माण्डस्य रचनां पुनः पुनः करोति । विश्व यस्य कर्मः अस्ति सः विश्वकर्मा इति। लोके देव–स्थपति स्वरूपे विख्याता विश्वकर्मा सम्भवतः ऋग्वेदे ऋषिः नाम्ना उल्लिखितः विश्वकर्मा एव अस्ति। ई.स.पूर्वे द्वितीय शताब्द्यां , शृङ्गकाले नाट्यशास्त्रस्य प्रणयन प्रसङ्गे नाट्यशालायाः निर्माण सम्बन्धितं भरतमुनिः विश्वकर्मणः कस्य ग्रन्थस्य सन्दर्भं करोति स्म। यथा–

**प्रमाणं यच्च निर्दिष्टं लक्षणं विश्वकर्मणा।**

**प्रेक्षागृहाणां सर्वेषां तच्चैव हि निबोधत।।**[२]

डॉ. शुक्लः समराङ्गणसूत्रधारे तथा अपराजितपृच्छाग्रन्थाधारे विश्वकर्मणस्य वंश–परम्परायाः निर्देशं कृत्वा विश्वकर्माः प्रभासवसोः पुत्रः कथयति।[३] तस्य मतानुसारं विश्वकर्मा सूक्ष्मकला, स्थापत्यकला, शिल्पकला, चित्रकला इत्यादि कलायाः निर्माणमेवं सौन्दर्य–अलङ्करणकार्येषु कुशलः ज्ञाता आसीत्। तथा सः निपुणः यान्त्रिकः अपि आसीत्। एषः भूमिसमुद्राकाशे चलित वायुयानस्य निर्माणमपि कृतवान्।[४] वाल्मीकिरामायणे द्वौ प्रकारस्य विमानस्य उल्लेखः प्राप्यते–

---

[1] मानसार, अ.२.२

[2] नाट्यशास्त्रम् २.१२

[3] समराङ्गणसूत्रधारः (भवननिवेश, भाग–१,हिन्दी अनुवाद) पृ.४

[4] वास्तुशास्त्र, भाग–१, हिन्दू साइन्स् ऑफ् आर्किटेक्चर,पृ–५९

प्रासादैश्च विमानैश्च लङ्का परमभूषिता। अकाशमार्गे गमनं (विमान पुष्पकविमानं) कर्ता तथा द्वितीयं भवनम्।[१] लङ्काधिपतेः रावणस्य पुष्पकविमानस्य निर्माणं विश्वकर्मा कृतवान्। वस्तुतः एतत् पुष्पकविमानस्य निर्माणं विश्वकर्मा ब्रह्मणः कृते निर्मितवान्। यथा–

**ब्रह्मणोऽर्थे कृतं दिव्यं दिवि यद्विश्वकर्मणा।**

**विमानं पुष्पकं नाम सर्वरत्नविभूषितम्।।** [२]

तथा महाभारते पाण्डवानां सभाभवने विश्वकर्मणःसभाभवनस्य जगतिनिर्माणे

**स्फटिकं स्थलमासाद्य जलमित्यभिशङ्कया।**

**स्व वस्त्रोत्कर्षणं राजा कृतवान् बुद्धिमोहितः।।**

**ततः स्फाटिकतोयां वै स्फाटिकाम्बुज शोभिताम्।**

**वापीं मत्वा स्थलमिव सवासाः प्रापतज्जले।।** [३]

अर्थात् स्फटिकस्य प्रयोगं कृत्वा विश्वकर्मणः एतावत् जगति निर्माणं कृतवान् यथा तत्रे जलयुक्त सरोवरस्य आभासः भवति तथा जलयुक्त सरोवरे शुष्कजगति दृश्यते ।

विश्वकर्मणश्चत्वारः पुत्राः आसन् –

---

[1] वाल्मीकि रामायण, सुन्दरकाण्ड,सर्ग–७–९ आदि

वाल्मीकि रामायण, युद्धकाण्ड, सर्ग– ३९.२१

[2] वाल्मीकि रामायण, सुन्दरकाण्ड,सर्ग–९.११

[3] महाभारत , सभापर्व,अ.३.४७.३–४,६

(१) जयः (२) मयः (३) सिद्धार्थः (४) अपराजितः।

एभिरार्यावर्तस्य विविधेषु प्रदेशेषु वास्तुशास्त्रस्य प्रचारः कृतः।

समरङ्गणसूत्रधार ग्रन्थानुसारं विश्वकर्मा स्वस्य मानसपुत्र जय द्वारा पृष्टानां प्रश्नानामुत्तरं ददाति तदा प्रप्रथमं कथयति– **'वदतो मेऽवधानेन श्रृणु यद् ब्रह्मणोदितम्।'**[१]

**मयः** –

भारतीय वास्तुशास्त्रस्य इतिहासे मयः एकः अत्यन्तं महत्त्वपूर्णं नाम अस्ति। मसत्यपुराणानुसारम् अष्टादशाचार्यानां गणना प्रसङ्गे मयस्य गणना अपि अस्ति। मानसारग्रन्थे प्रदत्त विवराणुसारं मयस्य उत्पत्तिः ब्रह्मणः दक्षिणमुखेन जातम्। यथा– दक्षिणे मयः।[२] इति उल्लेखं प्राप्यते।

वास्तुशास्त्रसम्बन्धितनैकग्रन्थेषू शीर्षकेषु मयशब्दस्य प्रयोगः दृश्यते। यथा– मयमतम्. मयमत–शिल्पशास्त्र –विधानम्, मयमतशिल्पशतिका, मयशिल्प , मयवास्तु, मयवास्तुशास्त्रम्, मयदीपिका, मयसङ्ग्रह तथा मयमतवास्तुशास्त्रम् इत्यादि। मयकृतग्रन्थानां मातृकाः, सन्दर्भाश्च प्राप्यन्ते। विशेषरुपेण स्थापत्यकला, शिल्पाः, यान विमानादयः, शय्यादि उपस्काराकाः इत्यादीनां निर्माणे मयस्य सिद्धान्तानां सर्वत्रपालनं दृश्यते।

स्वतन्त्रकलाशास्त्र ग्रन्थानुसारं कालान्तरे मयः एकः जातिवाचक नाम जातम्।तस्य एकः विशिष्ट संस्कृति आसित्।तस्य प्रसारः मध्य अमेरिकादेश पर्यन्तं

---

[1] समरङ्गणसूत्रधारः, अ.४.३

[2] मानसार अ.– २.६

प्रसरितमिति पुरातत्त्विय सम्बन्धि उत्खनने हनुमानः, गणेशः, इन्द्रादि देवानां मूर्तयः उपलब्धं जातम्।[१]

वाल्मीकिरामायणे – 'मयस्य मायाविहितं गिरिदुर्गं विचिन्वताम्।'[२] किष्किन्धाकाण्डे सर्ग २५-५३ पर्यन्तं भूगर्भे वर्तमान गिरिदुर्गस्य रमणीय रचना मयेन स्वस्य लोकोत्तर शक्तिद्वारा कृतवान्। महर्षि वाल्मीकि लङ्कानगरं विश्वकर्मा द्वारा निर्मितमिति कथयित्वा रावणस्य भवनसौदर्यवर्णनविषये लिखति –यथा भवनं सर्वाङ्गीण रमणीयतायां बहु अधिकं सुन्दरमासीत् यथा स्वयं **'मयेन साक्षादिव निर्मितानि।'**[३]

महाभारतेऽपि महास्थपति मयस्य वास्तुकौशलस्य अद्भुत प्रशंसां दृश्यते। मयेन एव पाण्डवानां विलक्षणं सभाभवनस्य निर्माणं कृतम्।[४] मस्त्यपुराणेऽपि मयेन दुर्ग-सन्निवेश विशेषज्ञ दर्शीतम्। मयः एतावत् दुर्गस्य निर्माणं कृतम् यथा दुर्गे द्वार त्रयं स्थितं तथा त्रयोद्वारोपरि त्रयं नगराणि स्थितानि।[५] मयस्य ज्योतिषशास्त्रे अपि महत्त्वपूर्णं योगदानं प्रवर्तते। मयस्य विरचितं सूर्यसिद्धान्तः, आसुरीविद्या, मयतन्त्रम्, यन्त्रविद्या आदि ग्रन्थानां लोके महत्त्वपूर्णं योगदानं वर्तते।

---

1 स्वतन्त्रकलाशास्त्रम् भाग-१, पृ. ६०५

2 वाल्मीकि रामायण,(जगदीश्वरानन्द) किष्किन्धाकाण्ड,सर्ग-२५.२१

3 वाल्मीकि रामायण,(श्रीनिवास कट्टी शास्त्री) सुन्दरकाण्ड,सर्ग-७.४

4 महाभारत , सभापर्व,अ.३.२२-३५(सभाभवन-वर्णन)

5 मस्त्यपुराणम् , अ.. १२९.४०

भारतीयस्थापत्यशास्त्रे आचार्य द्वयो: विश्वकर्मा मय: सम्बन्धित विद्वद्जनानां मतभेदा: प्रवर्तते। अधिकाशं विदुषानां मतानुसारं विश्वकर्मा भारतीय वास्तुकलाया: उत्तरीयाया: परम्पराया: तथा मय: दक्षिणीपरम्पराया: प्रतिनिधय: आसन्। परन्तु केषाञ्चित् विदुषां मतानुसारं सम्पूर्णभारते वास्तुकला द्वे भिन्नभागे न किन्तु एक एव अभिन्न परम्परा प्रचलितमासीत्। यथा रामायणे बालकाण्डे, किष्किन्धाकाण्डे, तथा सुन्दरकाण्डे वर्णिता क्रमश: अयोध्या, स्वर्णवनं, तथा लङ्कानगरस्य स्थापत्यकलाया: उल्लेखने त्रयं स्थानेषु वास्तुकला परम्परायां साम्यता दृश्यते। एतत् स्पष्टं भवति यत् भारतीयवास्तुकलायां द्वयं परम्पराया: वा शैल्याया: प्रचलनं नास्ति एवं न विश्वकर्मा उत्तरीयाया: परम्पराया: तथा मय: दक्षिणीपरम्पराया: प्रतिनिधय: आसन्। [१]

## मस्त्यपुराणे दर्शिता: आचार्या: -

मस्त्यपुराणे अष्टादश:(१८) वास्तुशास्त्रप्रवर्तकाचार्याणां गणनां वर्तते–

(१)भृगु:

(२)अत्रि:

(३)वशिष्ठ:

(४)विश्वकर्मा:

(५)मय:

(६)नारद:

(७)नग्नजित्

(८)विशालाक्ष:

[1] भारतीय वास्तुशास्त्रका इतिहास अ.१ पृ.२२

(९)पुरन्दरः

(१०)ब्रह्मा

(११) कुमारः

(१२)नन्दिशः

(१३)शौनकः

(१४)गर्गः

(१५)वासुदेवः

(१६)अनिरुद्धः

(१७) शुक्रः

(१८) बृहस्पति

सनत्कुमारशास्त्रे एकादश वास्त्वाचार्याणां गणना निम्नदर्शितरूपेण वर्तते–[१]

(१) ब्रह्मा

(२) इन्द्रः

(३) यमः

(४) भार्गवः

(५) अङ्गिरसः

(६) गौतमः

(७) गार्ग्यः

[1] वास्तुशास्त्रम्, भाग–१, हिन्दू साइन्स ऑफ् आर्किटेक्चर, पृ.६४

(८) मनुः

(९) व्यासः

(१०) भृगुः

(११) विश्वकर्मा आदयः।

विश्वकर्मावास्तुशास्त्रम् इति ग्रन्थे पञ्चादश (१५) वास्तुविद्याप्रवर्तकाचार्याणां परिगणना वर्तते–

**अगस्त्यो भगवान्नन्दी नारदश्च महामुनिः।**

**बृहस्पतिस्तिम्यलोकः काश्यपो लोकदर्शकः।।**

**कात्यायनो महातेजा मरीचिश्चित्रतोयकः।**

**पालकाप्यः पुण्डरीको दीर्धदर्शी पुनर्वसुः।।**

**योगसारो महातेजा ये चान्ये मुनिपुङ्गवाः।** [1]

यथा–

(१) अगस्त्यः

(२) नन्दी

(३) नारदः

(४) बृहस्पतिः

(५) तिम्यलोकः

[1] विश्वकर्मवास्तुशास्त्रम् , अ.१८.१–३

(६) काश्यपः

(७) लोकदर्शकः

(८) कात्यायनः

(९) मरीचिः

(१०) चित्रतोयकः

(११) पालकाप्यः

(१२) पुण्डरीकः

(१३) दीर्धदर्शीः

(१४) पुनर्वसुः

(१५) योगसारः।

वास्तुशास्त्रम् इति ग्रन्थे डॉ. शुक्लेन प्राचीन वास्तुशास्त्रोपदेष्टृणां विस्तृतं विवरणं प्रदत्तं तथा तेन द्वारा रचितं केषाञ्चित् वास्तुशास्त्रीय ग्रन्थानां नामोल्लेखमपि दत्तम्।[१] यथा–

(१) अगस्त्य– अगस्त्य सकलाधिकारः तथा अगस्त्य प्रोक्त सर्वाधिकारः

(२) कश्यपः – काश्यपशिल्पः

(३) नारदः – नारदसंहिता तथा नारद–शिल्पः।

(४) नग्नजित् – चित्रलक्षणम्।

(५) पिशुनः – वास्तुविधानम्।

---

[1] समराङ्गणसूत्रधारः (भवन–निवेश, भाग–१,हिन्दि अनुवाद),प–५

(६) पराशरः – वास्तुशास्त्रम्।

(७) विश्वकर्मा –विश्वकर्मशिल्पः, विश्वकर्मासंहिता, विश्वकर्मापुराणम्, विश्वकर्मवास्तुशास्त्रम्, इत्यादि।

(८) सनत्कुमारः — सनत्कुमारवास्तु।

(९) सिद्धार्थ – सिद्धार्थ–पृच्छा तथा सिद्धार्थसंहिता।[१]

एते प्रायः वैदिकाः वा पौराणिकाः ऋषयः वा वास्तुशास्त्रप्रणेतारः सन्ति किन्तु प्रायः तेषां अधिकांशाः ग्रन्थाः गुप्तकालिनाः तस्मादपि परवर्तिनः प्रतीयन्ते।[२]

## ८.प्रमुखवास्तुशास्त्रीय ग्रन्थानां सामान्य परिचयः –

वास्तुवाङ्मये विश्वकर्मणः मयस्य च ग्रन्थानां विशेषप्रचारः आसीत् किन्तु प्रतीयते यत् विश्वकर्मनाम्ना उत्तरभारतात् दक्षिणभारतपर्यन्तं ग्रन्थरचना अभवदिति विश्वकर्म देवतानां वर्धकिः इति कथितम्।

### विश्वकर्मवास्तुशास्त्रम् –

प्रस्तुतः ग्रन्थः वास्तुविद्यायाः प्रतिनिधित्वस्य महत्त्वपूर्णः ग्रन्थः अस्ति। अत्रे कुल ८७ अध्यायाः सन्ति। अत्र भवनं, देवालयं, ग्रामं तथा नगरमित्यादिनां वर्णनं वर्तते। समुद्र–नदी–पर्वतीयप्रदेशे जननिवेशस्य आवश्यकतायाः प्रणयनं प्रशस्तं विश्वकर्मा करोति स्म। जीर्णनगराणां जीर्णोद्धारं कृत्वा एतेषां नगराणां पुर्ननिवेशस्य

---

[1] कन्ट्रिब्युशन टू ए बिब्लिआग्राफिक ऑफ इण्डियन् आर्ट् एण्ड एस्थेटिक्स् (हरिदास), पृ.५४–७३–रुपमण्डन, भूमिका पृ–३

[2] रुपमण्डन, भूमिका, पृ–३–४

मतमपि प्रदत्तवान्। एतस्मिन् ग्रन्थे प्रायः द्वादश ग्रमानामुल्लेखो प्रवर्तते। अत्र भिन्न-भिन्न देशानां विभागानुसारं नैकलक्षणस्य प्रदर्शनं वर्तते। एतेषां सर्वाणामध्यायानुसारं क्रमशः संक्षेपेण निम्नदर्शितेन अस्ति। यथा हि –

**अतो लोकेषु सर्वेषु शिल्पं बहुविधं ततम्।**
**ग्रामाणाश्च पुरीणाश्च लक्षणं बहुधा स्मृतम्।।**
**खेटकर्वटकादीनां दुर्गाणामपि लक्षणम्।**
**प्रासादेषु च हर्म्येषु देवानां भूभुजामपि।।**
**विविधेष्वपि निर्माणेष्वपि सन्दूप्वकं बहु।**
**भवने न्यायाशालायां समायं कोशसद्मनि।।**
**अन्तःपुरे शस्त्रगेहे शालाषु विविधासु च।**
**क्रिडागेहेषु रम्येषु तोरणादिषु मञ्चिके।।**
**अधि-ष्ठानोपपीठेषु गोपुरेषु तथा बहु।**
**सङ्कीर्णभवनाढ्येषु पताकापारिभद्रके।।**
**चातुवर्ण्येगृहाणाश्च लक्षणं बहुधा स्मृतम्।**
**वेदिका पोतिकासन्धिबन्धनावरणेषु च।।**
**स्तम्भादिके च निर्माणे विधेषभवनेषु च।**
**मण्डपेषु विमानेषु प्राकारादिषु यन्मतम्।।**
**लक्षणं बहुधा प्रोक्तं नानादेश विभागशः।**
**सकलं तच्च संक्षिप्य वक्ष्येऽध्यायक्रमादहम्।।** [१]

**समराङ्गणसूत्रधारः** –

[1] विश्वकर्मवास्तुशास्त्रम् , अ.२.३३-४०

महाराजाधिराजस्य भोजदेवस्य विरचित समराङ्गणसूत्रधारः ग्रन्थः भारतीय वास्तुशास्त्रस्य मूर्धन्यः ग्रन्थरत्नः अस्ति। अत्र वास्तुशास्त्रीयसर्वप्रमुखविषयस्य प्रतिपादनमस्ति। एषः ग्रन्थः अत्यन्तं पारिभाषिकः एवं वैज्ञानिकःअस्ति। अस्मिन् ग्रन्थे प्रमुखतः त्रिविधप्रकल्पितभवनानां त्रिणि प्रकाराणि भवनानां– जनभवनस्य, राजभवनस्य तथा देवभवनस्य रचना–सिद्धान्ततानां समुचितं वर्णनं वर्तते।

एतस्मिन् ग्रन्थे मुख्यतया वास्तुशिल्पस्य वर्णनमेवं यन्त्राणां विशदं वर्णनेन सह सैद्धान्तिकं तथा व्यावहारिकं वर्णनं प्रतिपादितमस्ति। एतस्य ग्रन्थस्याधारे वास्तुवेदस्य विस्तृततायाः आत्मसात् कर्तुं शक्यते।

विश्वकर्मीय–परम्परायां प्राप्यमाणेषु उत्तरापथीय वास्तुग्रन्थेषु समराङ्गणसूत्रधारस्य नाम प्रमुखतया स्वीक्रियते। ग्रन्थोऽयं धारा–मालवायाः परमारराजाभोजस्य कृतिरिति मन्यते। भोजस्य ८४ उपनामानि आसन्, सर्वेषु ग्रन्थप्रणयनमभवत्। भोजः १०१०–१०४५ ईसवीयपर्यन्तं राज्यं कृतवान्। तस्य विजयगाथाः प्रसिद्धाः। चेदीश्वरेन्द्ररथतोग्गलभीममुखान् कर्णान्लाटपतिगुर्जरराट् तुरुष्कान्ः यद्भृत्यमात्रविजिता नवलोक्य मौलादौष्णां बलानि कथयान्ति न योद्धलोकान्। बिल्लः एवमलिखित् – पण्डिता मण्डिताः सर्वे भोजराजे भुवं गते लक्षं महाकवेर्देयं तदर्धं विबुधस्य च देयं ग्रामेकमर्धस्य तस्याप्यर्धमर्थिनः।।[१] न्तीतवान् भोजः चित्तौडगढे उषित्वा स्वीयं 'कौमारकालम्' तदा तत्र समीधेश्वरमहादेवमन्दिरं निर्मापितावान्। तत्रैव अस्य ग्रन्थस्य प्रणयनं जातम्। सम्भवतः चित्तौडगढस्यैव पूर्वनाम चित्रकूटः आसीत्। चित्रकूटशैल्याः पीठिका, प्रासादशैल्यादीनां स्वीयग्रन्थे भोजः सम्मानपूर्वकमस्मरत्।

---

[1] भोजप्रबन्धश्लोकः –३२६–३२७

समराङ्गणसूत्रधारग्रन्थः ८३ अध्यायेषु विभक्तः। प्रायः ८००० श्लोकेषु निबद्धः। जयस्य प्रश्नेन ग्रन्थकारः अस्मिन् प्रतिपादविषयाणामाधाररेखां प्रस्तौति। तत्पश्चात् तेषामेव समाधानं कृर्वन् ग्रन्थमपूरयत्।

पूर्वमेकार्णवे जाते जगति प्रलयं गते। महाभूतामरपुरीज्योतिषां कथमुद्भवः। किमाकारा किमाकारा किप्रमाणा च मेदिनी। विस्तृतिः परिधिश्चास्या बाहुल्यमपि कीदृशम्।। उच्छ्राय–व्यासदीर्धत्वैः कैः केऽस्यां कुलभूभृतः। कति ख्यातानि वर्षाणि द्वीपा नद्योऽबगआयस्तथा।। काः सूर्येन्दुग्रहर्क्षादिगतयश्च पृथक्–पृथक्। भूमेरुपरि किं चैषामन्योन्यं प्रोक्तमन्तरम्। किमाधारं दिवि ज्योतिश्चं भ्रमयते च कः। लोके कथं महाभूतान्यूर्ध्वाधो बिभ्रति स्थितिम्।। युगधर्म्व्यवस्थाभिः काश्चादौ लोकवृत्तयः। कश्चादिमस्ततो राज्ञां ग्रहाणां वर्णिनां कथम्।। कति देशाः कति भुवः पृथक्त्वेन निरुपिताः। कार्यः क्व च कथं सन्निवेशो जनपदाश्रयः।।[१]

**व्यक्तचिह्नैः स्वनस्पर्शगन्धवर्णरसादिभिः। काः शस्ता निन्दिताः काश्च पुराणामपि भूमयः।। कार्यं केन विधानेन भूभृत्पुरनिवेशनम्। किंफलं सुनिवेष्टेऽस्मिन् दुर्निविष्टे च किं पुनः।। कतिप्रकारं दुर्गं च दुर्गकर्मक्रमश्च कः। किमग्रपुरसंस्थानमनिन्द्यं किं च निन्दितम्।। कश्चात्रानुक्रमविधिः प्रमाणैरुपपादितः। प्राकारगोपुराट्टालपरिखावप्रकर्म च।। तमङ्गनिर्गमद्वारप्रतोल्यट्टालकादिभिः। कीदृशः विभागश्च रथ्याचत्वारवर्त्यभिः।। भूमिप्रमाणसंस्थानं सीमा च क्षेत्रदिक्पथैः।**

---

[1] समराङ्गणसूत्रधार(पूष्पेन्द्र), अ.३.४–१०

**नगरग्रामखेटानां निवेशाः स्युः पृथक्-पृथक्।। पुरस्याभ्यान्तरे पूर्वं कैर्द्रव्यावयवक्रमैः। कस्मिन् स्थाने कथं कार्यं शक्रध्वजनिवेशनम्।।** [1]

समराङ्गणसूत्रधारग्रन्थे वास्तुविद्यायाः विस्तृतं स्वरूपमधोलिखितेषु अष्टस्याङ्गेषु निहितम् –

(१) वास्तुपुरुषस्य विकल्पना।

(२) पुरनिवेशः द्वारकर्म च। नगरे चतुर्दिशानामुपदिशानां महाद्वाराणां, पक्षद्वारस्य, लधुद्वारस्य, गोपुरद्द्वारस्य, प्रतोलीत्यादीनां च निर्माणम्।

द्वार–मार्ग–क्रम–पुरादीनां चतुर्दिक्–प्राकारस्य, नगरक्षणस्थल्याः, परिखायाः अगाधखननस्य, वप्रनिर्माणस्य, अट्टालकविनिवेशस्य, राजमार्गस्य, रथमार्गस्य, यानमार्गस्य, घण्टामार्गस्य, सुरङ्गादिनानावर्गीय मार्गस्य, प्रतोलेः, विथिकादीनाश्च निर्माणम्।

(३) प्रासादः देवभवनं वा देवालयानां निर्माणेन सह तेषां विभिन्नाङ्ग भूत विषयाणां, प्रतिकृतेः आकारः, संस्तवः, प्रत्यङ्गः, भूषा, शिखरः, रचना, शैली, देववृन्दः, मण्डपः, गोपुरः, प्राकारः, प्रदक्षिणापथः, कूर्मशिला, आमलकादीनां निर्माणम्।

(४) शक्रध्वजोच्छ्रितः – विमानादीनां निर्माणं कृत्वा इन्द्रध्वजमहोत्सवस्य आयोजनम्।

(५) राजवेश्म – राजभ्यः आवश्यकभवनानां, हर्म्याणां सौधानां पञ्च–षट्–सप्त–कक्षाणां, मण्डप–क्रीडास्थान–विश्रामस्थली–दूतावास–चित्रशाला–जालाङ्लकारः, पण्यस्थ–उद्यानादीनां च निर्माणम्।

---

[1] समराङ्गणसूत्रधार(पूष्पेन्द्र), अ.३, ११–१७

(६) चातुर्वर्ण्य विभागः- विभिन्न जातीनां, वर्णानामावासः, व्यवसायजीविनां कार्यशालादीनां संरचना, जलभवनं, शालाभवनं वा।

(७) वेदीनिर्माणम्- यज्ञयागादिनिमित्तं कुण्ड-यज्ञमण्डप-होमगृहस्य संरचना।

(८) शिविरनिवेशः - यात्रादि प्रयोजनार्थं शिविरादीनां निर्माणं, दुर्गादीनां (जलदुर्ग-पङ्कदुर्ग-वनदुर्ग-ईरिणदुर्ग-पर्वतीयदुर्ग-महादुर्गश्च) निर्माणम्।[1]

एवमेव अस्मिन् ग्रन्थे विषय-प्रवर्तनमेवं पृष्ठभूमिः, वास्तुविषयः तथा आवश्यक सामग्री, आवास-नियोजनमेवं काष्ठसंग्रहः, उत्सवादि विषयाः, आय-व्ययादि गणितं , सभा, गृहद्रव्यादि, यन्त्रोपस्कारकः, गजाश्वशालादि, शिलान्यासादि क्रियात्मक अनुष्ठानमेवं चयकार्यं, विविधाः प्रासादानां जातिप्रसादोपयोगिनः मण्डपाः, जगती, लिङ्गपीठादीनां वर्णनं, चित्रकर्मं, मानप्रमाणमेवं मूर्ति स्वरूपविवरणादिनां वर्णनं विशदं प्रतिपादितमस्ति।

**अपराजितपृच्छा –**

अपराजितपृच्छा भारतीयस्थापत्यकलायाः, मूर्तिकलायाः एवं चित्रकालयाः स्थापत्यविज्ञानस्य अनन्यः ग्रन्थः अस्ति। एषः वास्तुशास्त्रीय ग्रन्थेषु लब्धप्रतिष्ठितः ग्रन्थः अस्ति। अत्र गुजराते प्रचतिलं शिल्प-परम्परायाः समुचितं सङ्कलेनसह भारतीय स्थापत्यस्य व्यापकोद्देश; तथा कलायाः आधारभूतं तत्त्वानामेवं ज्योतिर्विज्ञानस्य पूर्णतया वर्णनं प्रतिपादितमस्ति। अपराजितपृच्छाग्रन्थस्य रचयिता श्रीभुवनदेवाचार्यः अस्ति।

---

[1] भवननिवेशः, पृ-४०

अपराजितच्छाया: अपरनामानि **सूत्रसन्तानगुणकीर्तिप्रकाशः** वा **सूत्र-सन्तानः** इति। अस्य ग्रन्थस्य प्रत्येकाध्यायान्ते **इतिसूत्रसन्तानगुणकीर्तिप्रकाशप्रोक्तश्रीभुवनदेवाचार्योक्तापराजितपृच्छायाम्** इति वाक्यं रचयिता लिखितमस्ति। श्रीभुवनदेवाचार्य: सम्भवत: विश्वकर्मा एव अस्ति।

अस्य ग्रन्थस्य रचनाकाल: अनिश्चित: अस्ति तथापि तस्य रचनाकाल: १२शताब्द्या: उत्तरार्ध: तथा १३ शताब्द्या: पूवार्ध: एवं समराङ्गणसूत्रारस्य पश्चात मन्यते। अस्मिन् ग्रन्थे कुल २३६ सूत्राणि उपलभ्यन्ते। अस्य द्वितीयसूत्रे ग्रन्थस्य विषयवस्तुन: समग्रासूची उक्ता। अपराजितेन विश्वकर्माणं प्रति प्रश्नरुपेण ग्रन्थस्य विषयानुक्रमणिका दत्ता। कयायुक्त्या ब्रह्माण्डादे: रचनाभवत्, केन हेतुना तस्य विस्तार: भवति, केन प्रयोजनेन विकासो भवति, तं क: धरति क: पृथिव्या: आधारा:, आकाश: कथं स्थित:, पर्वतानां–कुलाचलशैलानां क: आधार: इति । सप्तद्वीपान् धरन्ती या वसुन्धरा किं वा तस्या: प्रमाणं, अस्या: उपरि विद्यमानां समुद्र–वन–उपवन–कानन–द्वीप–उपद्वीपादिक्षेत्राणां प्रमाणमपि । अस्य जम्बूद्वीपस्य मध्ये के के नवद्वीपा: सन्ति, उत्तमस्य भारतक्षेत्रस्य किं प्रमाणम् । स्वेदज–अण्डज–पिण्डज–जरायुजादिभूतप्राणिनां विषये कथयतु। कस्य क्षेत्रस्य क: धर्म:, क: क्षेत्रो रमणीय:। द्विजानां कीर्ति:, देवालयेभ्य:, समस्तजनेभ्य: च भवनानि, प्रासादा:, प्रसाधनानि इत्येषां च वास्तो: च उत्पत्तिम्। अनेनैव प्रकारेण निघण्टुम्, एकपदादारभ्य एकसहस्त्रपदपर्यन्तं वास्तुपदविन्यासमपि। अनयैवरीत्या मर्म–उपमर्म–वंश–रेखा–षटक्–संख्या:–वज्र–त्रिशूल–हल–हस्त–सूत्रादि पद्मक–बलिकर्मणां च विधि:। वास्तुपदानुसारेण तत्र न्यस्तानां देवतानां च विषय:। समस्तप्रासादभवनानां स्थानविषयेऽपि। अनेनैव क्रमेण हस्तलक्षण–हस्तमान–हस्तपदानुसारं तत्रस्थदेवतानां

मानोन्मानप्रमाणानां, तेषां च समस्तकर्मणां चोपयोगः, सूत्रधारस्य परीक्षाविषयः, वर्णादिविषयः। भूमेः लक्षणं, दीपस्य वर्त्तिकेव पूर्वादिदिशानां ज्ञानं येन विधिना सम्भवति तत् सर्वम्। भवनादीनां प्रस्तारक्रमसूत्राणां, जनावासोपयोगी पुर–नगर–ग्राम–खेट–कूट–कर्वट–विषयोऽपि। पुरस्य परिखा–प्रतोली–मार्गः–गोपुर–राजभवन–सभा–अश्वगजादीनां शालानां विषयः। निर्माणकार्या च सूत्रपातविदिः, आयव्यादिलक्षणानि, ज्यौतिषं स्त्रीपुरुषलक्षणानां विषयः। प्रासाद–प्रतिमा–लिङ्ग–जगती–पीठ–मण्डप–वैराज्यादिप्रासादाः निर्मीयमाणानां नानाविधप्रासादानां, अष्टजातिछन्दसां, देशानुरुप सूत्रप्रमाणम्। प्रासादानां शिखरेभ्यः प्रयुज्यमाणानां नानाविधरेखाणां, शिखरोपयोगि–घण्टा–कलश–ध्वजादिनिर्माणेप्रमाणम्।[१] एताषामतिरिक्तमपि अन्य विषयाणां वर्णनमस्मिन् ग्रन्थे प्रतिपादितमस्ति।

**मानसार –**

अयं द्राविडवास्तुग्रन्थः प्रयागविश्वविद्यालये डीन फेकल्टी ऑफ आर्ट्स पदभाजा प्राच्यविभाध्यक्षेण संस्कृतप्रधानाध्यापकेन श्रीप्रसन्नकुमाराचार्यमहोदयेन, प्राचीनहस्तलिखितपुस्तकेभ्य आधुनिकपाश्चात्यरीत्या संस्कृत्य संपादितम्।

ग्रन्थारम्भे उक्तं यत् –

**एतैः रचित मानऋषिणा विस्तारिता च।**

**गङ्गाशिरः कमलभूकमले श्रणेन्द्रगीर्वाणनारदमुखैरखिलैर्मुनीन्द्रैः।**

---

[1] अपराजितपृच्छा, सूत्र–२

**प्रौक्तं समस्ततरवस्त्वपि वास्तुशास्त्रं तन्मानसार ऋषिणपि हि लक्ष्यते स्म।**[१]

वास्तुशास्त्रं, गङ्गा शिरसि धरति तस्मात् शङ्गारा, आरभ्य, कमलात् उत्पन्नः यो ब्रह्माकमलसमाननयने यस्य स विष्णुः, इन्द्रः, बृहस्पतिः, नारदादिमहर्षयः।

अत्र खलु मानसारे प्रस्तुताः विषयाः सप्ततिसंख्याकैः प्रकरणैर्विभक्ताः। तत्र प्रथमेऽनुक्रमणिका। मानोपकरणं चादौ शिल्पिलक्षणम्। वास्तुप्रकरणं भूपरीक्षाविधिः तथा भूसंग्रहहस्ततः शङ्कुस्थापनविधानम्। देवादीनां स्थापनाय पदविन्यासलक्षणम्। बलिकर्मविधिस्यैव ग्रामादीनां लक्षणम्। नगरविधानं, भूमिलम्बविधानकम्। गर्भविन्यास-विधानं चैव चोपपीठस्य लक्षणम्। अधिष्ठानविधानकं चैव पादमानस्य लक्षणम्। प्रस्तरविधिं तथा सन्धिकर्मणा लक्षणम्। विमानलक्षणं चैवमेकभूम्याश्च लक्षणं, द्वितलस्य विधिः चैव त्रितलस्य विधाननकम्। चतुस्तलविधिः, पञ्चभूम्याश्च लक्षणं, षट्तल-सप्ततलकं चैवमष्टभूनवभूमिकम्। दशभूमिविधानं च रुद्रभूमिविधानं, तलं द्वादशकं लक्षणस्य वर्णनं वर्तते। तथा च प्राकाराणां लक्षणं, परिवारलक्षणं च गोपुराणां लक्षणं, मण्डपविधानं च शालानां चैव लक्षणम्। विन्यासश्च गृहस्याथ गृहप्रवेशलक्षणं, द्वारस्थापनविधिः चैव द्वारमानस्य लक्षणं, यानादिरथलक्षनम् शयनस्यलक्षणं चैव सिंहासनलक्षणम्। तोरणस्य-मध्यरङ्गस्य-कल्पगृक्षस्य लक्षणम्। अभिषेकलक्षणं चैव सर्वभूषणलक्षणं, ग्रह्मादिनां त्रिमूर्तेश्च लक्षणं, लिङ्गलक्षणम्। पीठस्य लक्षणं चैव शक्तीनां लक्षणं तथा बौद्धस्य जैनिकानां च लक्षणं मुनिलक्षणम्। यक्षविद्याधरादीनां लक्षणं भक्तलक्षणं, ब्रह्मादीनां च देवानां तत्तद्वावहनलक्षणम्। प्रतिमानां लक्षणं, चोत्तमदशतालस्य लक्षणम्। मध्यमस्य दशतालस्य लक्षणं,

[1] मानसार, अ.१.२

प्रलम्बलक्षणं चैव मधूच्छिष्टविधानकम्। तथा च लक्ष्यते सर्वमङ्गदोषविधानकं, नयनोन्मीलनं चैव लक्षणम् अस्मिन् ग्रन्थे प्रतिपादितमस्ति।[१]

राजवल्लभं सूत्रधारमण्डनस्य अनन्य महत्त्वपूर्णा रचना अस्ति। राजवल्लभं राजवल्लभवास्तुशास्त्रम्, राजवल्लभमण्डनम्, वा वास्तुराजवल्लभमिति नाम्ना प्रख्यातम्। मण्डनः अमुं भूपतिवल्लभमिति कथितवान्। रचनाकालतः वर्तमानकालपर्यन्तं वास्तुकर्मकारेभ्यः, अध्येतृभ्यः, आदरणीयः प्रचलति। यथा रुपमण्डनान्तरं प्रतिमाशास्त्रं मण्डनः देवतामूर्तिप्रकरणे सम्पूर्णतया विस्तृतया कर्तुम् उपक्रमत्, तथैव वास्तुसारमण्डनस्य वास्तुमण्डनस्य च किञ्चित् अपूर्णसामग्रिं सः राजवल्लभे मेलयितुं योजयितुं, विस्तारयितुं च श्रमसाध्यप्रयासमकरोत्। अस्मिन् १४७२ श्लोकाः आहत्य १४ अध्यायाः सन्ति किन्तु मूलतः १३ एव अध्यायाः भवेयुः यथा शालगृहाध्यायानां विभागं दृष्ट्वा ज्ञातुं शक्यते। यत् अस्य अध्यायानां संज्ञाःएवं संख्या एवं भवन्ति –

(१) मिश्रकलक्षणं नाम प्रथमोऽध्यायः।

(२) वास्तुलक्षणम्।

(३) आयादिलक्षणम्।

(४) दुर्गपुरयन्त्रजलाशयादिवर्णनम्।

(५) राजगृहनिवेशादिलक्षणम्।

(६) ऐकशालद्विशालगृहलक्षणम्।

---

[1] मानसार, अ.१.३–१९

(७) द्विशालित्रशालचतुश्शालगृहलक्षणम्।

(८) शय्यासिंहासनच्छत्रगवाक्षसभाष्टकवेदिकादीपस्तम्भलक्षणम्।

(९) राजगृहादिगृहलक्षणम्।

(१०) गणितक्षेत्राद्भूतलक्षणम्।

(११) तिथिवारनक्षत्रगृहनिवेशगृहप्रवेशविवाहमुहूर्तलक्षणम्।

(१२) गोचरदिनरात्रिमानस्वरोदयकोटचक्रं मातृकालक्षणम्।

(१३) ज्योतिषलक्षणम्।

(१४) शकुनलक्षणम्।

अस्य ग्रन्थस्य प्रथमप्रकाशनं नारायणभरती यशवन्तभारती गुर्जरभाषायामनुवादसहितं १८८८ ईसवीय तमे वर्षे पालीताणातः अकारयतः। तत्पश्चात् रामयत्नओझा महोदयः अमुं वास्तुराजवल्लभनाम्ना बनारसतः प्रकाशयत्। डॉ. शैलजा पाण्डेयः अमुं पुनस्संपादनसहितं चौखम्बातः २००२ वर्षे सानुवादं प्राकाशयत्। अस्य समग्राध्ययनसहितं विस्तृताकारेण सचित्रसोदाहरणं प्रकाशनं डॉ. श्रीकृष्ण जुगनू महोदयः कृतम्। अस्य अयं ग्रन्थः परिमलपब्लिकेशन्स् दिल्लीतः २००४ वर्षे प्रकाशितोऽभवत्।

**वास्तुसारमण्डनम् –**

अयं सूत्रधारमण्डनस्य संक्षिप्तः किन्तु वास्तुविज्ञानदृष्ट्या अतिवमहत्त्वपूर्णः ग्रन्थः। अस्मिन् गृहारम्भः, गृहप्रवेशनियमाः, मुहूर्तादारभ्य आयादिगणितः, वेधगृह–शाला–अलिन्द–गवाक्ष–उद्यानारान–गृहाङ्गाः, नगर–पुर नियोजनेत्यादिविषयान्

व्यावहारिकरुपेण लिखितमस्ति। सामग्री आधारेण डॉ.श्रीकृष्ण जुगनूः अस्याद्यायान् निम्नरीत्या वर्गीकृतवान् –

(१) मिश्रकलक्षणम्.

(२) आयादिगणितज्ञानम्।

(३) भूमिगृहप्रमाणश्च।

(४) शालादिः पानञ्चवास्तुचक्रपूजायाम्।

(५) नगरपुरञ्चजलाश्रयोद्यानम्।

(६) एकशालद्विशालादिगृहलक्षणम्।

(७) प्रतिष्ठाप्रवेशमुहूर्तशकुनलक्षणम्।

अननैव नाम्ना एका मातृका एशियाटिक सोसायटी, कोलकातायां सङ्गृहीताः वर्तते। यस्याः अन्तिमश्लोकः उक्तग्रन्थादेवास्ति, किन्तु प्रारम्भिकश्लोकाः सर्वथा पृथक् सन्ति।

सर्वप्रथमतया अमुं प्रभाशङ्कर ओघडभाई सोमपुरा अहमदाबादतः प्राकाशयत्। अस्य हिन्द्यां अध्यायानां सुनियोजितविभाग सहितं डॉ. श्रीकृष्ण जुगनू न्यू भारतीय बुक् कॉर्पोरेशन् दिल्लीतः २००५ वर्षे आयतत्त्वम् इति पुस्तकस्य पूर्वार्धरुपेण प्राकाशयत्।

**मयमतम् –**

मयोक्तं वास्तुशास्त्रं प्रायः द्विसहस्त्रवर्षेभ्यः स्वस्य अद्भुत प्रभविष्णुतां प्रादर्शयत्। मयमतमे मयस्य समग्रवास्तु–शिल्प–सिद्धान्तानां सम्यक् शिल्पस्य महत्त्वं भवति। मयस्य शास्त्रमिदं प्रासङ्गिकमेव स्थाप्यति। प्रायः ३३२५ शलोकात्मकस्य, ३६ अध्यायात्मकस्य ग्रन्थस्य प्रथमखण्डे आहत्य १८ अध्यायाः सन्ति। सङ्ग्रहः

वस्तुप्रकार:, भूपरीक्षा:, भूपरिग्रह:, मानोपकरणम्, दिक्परिच्छेद:, पददेवताविन्यास:, बलिकर्मविधानम्, ग्रमविन्यास:, नगरविधानम्, भूलम्बविधानम्, गर्भविन्यास:, उपपीठविधानम्, अधिष्ठानविधानम्, पादप्रमाणद्रव्यपरिग्रह:, प्रस्तरकरणम्, सन्धिकर्मविधानम्, शिखरकरणभवनकर्मसमाप्तिविधानम्, एकभूमिविधानम्, गोपुरविधानम्, मण्डपलक्षणम्, शालाविधानम्, चतुर्गृहविदानम्, गृहप्रवेश:, राजवेश्म–विधानम्, राजद्वारविदानम्, यानाधिकार:, शयनसिंहासनाधिकार:, लिङ्गलक्षणम्, पीठलक्षणाधिकार:, अनुकर्मविधानम्, एवं देवप्रतिमालक्षणम्।

अस्य ग्रन्थस्य प्रथम प्रकाशनं टी.गणपति शास्त्री महोदयै: सम्भवत: १९११ तमे वर्षे अनन्तशयन संस्कृत ग्रन्थावल्या: ग्रन्थाङ्क संख्या ६५ अकरोत्। अस्य ग्रन्थस्य पुन: प्रकाशनं पॉण्डिचेरी फ्रेञ्च इंस्टिट्युट् कृते १९७०–७६ तमे वर्षे अभवत्। तत्पश्चात् अस्य ग्रन्थ: १९८५ तमे वर्षे सीताराम भारतीय इन्स्टिट्यूट ऑफ साईन्टिफिक रिसर्च, दिल्लीत: प्रकाशितमभवत्। तत् पश्चात् इन्दिरा गाँधी नेशनल सेण्टर फॉर ध आर्ट्र्स, दिल्ली एवं मोतीलाल बनारसीदास पब्लिशर्स प्रा.लि.त: कलामूलशास्त्र ग्रन्थमाला–१४ अन्तर्गतं ब्रूनो डिंगोस् महोदय: आग्लभाषायामनुवाद: सहितम् अेप्रिल–१९९४ तमे वर्षे प्राकाशयत्। अनन्तरं अस्य ग्रन्थस्य हिन्दीभाषायामनुवाद: सम्पादनश्च डॉ. श्रीमती शैलजा पाण्डेय २००७ तमे वर्षे चाखम्बा सुरभारती प्रकाशन, वाराणसीत: प्रकाशितं कृतवती।

अन्य प्रामाणिकटिप्पणीसहित: विस्तृत: हिन्दी अनुवाद: श्रीकृष्ण जुगनू महोदयेन २००८ तमे वर्षे अकारि। अयं ग्रन्थ: चौलानां शासनकाले यदा देवालयानां निर्माणकार्यं निरन्तरमभवत्, तदा पुनस्सम्पादितोऽभवत्। पूर्वकाले स्वतन्त्ररूपेण महस्य कोऽपि ग्रन्थ: आसीत् इति प्रतीयते, यस्य संक्षिप्तत्वात् अन्यमतानि तस्मिन्

मिलिताः, अथवा स लुप्तोऽभवत्, तस्य च श्रुतपरम्पराधारितोक्तीनां सम्पादनं कुर्वद्भिः अन्य मतानां सम्बन्धः कल्पितः। अयं ग्रन्थः मयस्य सिद्धान्तैः सह अन्यान्यानामेतद्विषयकमतानां सङ्ग्रहोऽपि वर्तते। पूर्वेषु ग्रन्थकृत् स्वयन्भुवमतं, पितामहस्य हिरण्यगर्भस्य वा मतं, अगस्त्य मतं, विङ्गलमतं, इत्यादिभिः सह आगमानां तन्त्रशास्त्रणां च उल्लेखमकरोत्। केचित् पूर्वसूरिभिः, पुराणैः, पूर्वाचार्यप्रोक्तं इत्यादयः उक्तयः अस्मिन् ग्रन्थे सन्ति यत्र अस्याः परम्परायाः प्रवाहं प्रदर्शयन्ति तत्रैव अस्य ग्रन्थस्य भयसहितानां अन्येषां मतानामपि सङ्कलनस्वरुपाणि सिद्धायन्ति।

## ९.अन्यवास्तुशास्त्रीय ग्रन्थानां नामानि –

उपरोक्त ग्रन्थानांमतिरिक्तमन्यापि वास्तुशास्त्रीयग्रन्थाः लोके वर्तन्ते। डॉ.पी.के.आचार्य महोदयैः प्रायः १५० वास्तुशास्त्रीय ग्रन्थानं सूचीः प्रदत्तवान्। तेषां कतिपयः प्रमुख वास्तुशास्त्रीय ग्रन्थानां नामानि सन्ति –

(१) मानसारः
(२) मयमतम्
(३) नग्नजित–चित्रलक्षणम्
(४) काश्यप–शिल्पम्
(५) अगस्त्य–सकलाधिकारः
(६) वास्तुपुरुषविधानम्
(७) प्रयोगमञ्जरी
(८) प्रयोगपारजितः
(९) शिल्परत्नम्
(१०) शुक्रनीतशिास्त्रम्

(११) शिल्पसङ्ग्रहः

(१२) तन्त्रसमुच्चयः।[१]

डॉ.शुक्लः अपि कतिपय वास्तुशास्त्रीयग्रन्थानां सूचीः दत्तम्। यथा हि–

(१) विश्वकर्मशिल्पम्

(२) विश्वकर्माप्रकाशः

(३) विश्वकर्मवास्तुशास्त्रम्

(४) सनत्कुमारवास्तुशास्त्रम्

(५) समराङ्गणसूत्रधारः

(६) युक्तिकल्पतरुः

(७) अपराजितपृच्छा

(८) वास्तुराजवल्लभः

(९) प्रासादमण्डनम्

(१०) राजसिंह–वास्तुशास्त्रम्

(११) भुवनप्रदीपः

(१२) बृहच्छिल्पशास्त्रम्

(१३) मानसोल्लासः

(१४) मनुष्यालयचन्द्रिका

(१५) रुपमण्डनम्

(१६) वास्तुविद्या

---

[1] एन एन्साइक्लोपीडिआ ऑफ हिन्दू आर्किटेक्चर, मानसार सीरिज, भा.७

(१७) वास्तुरत्नावली

(१८) पौराणिकवास्तुशान्तिप्रयोग:

(१९) वास्तुमुक्तावली

(२०) वास्तुसङ्ग्रह: वास्तुसार:(प्राकृते)।[1]

निम्नलिखित कृतय: आचार्य विश्वकर्मणस्य सम्बन्धितं डॉ.टी.अफ्रेक्ट महोदयै: दत्तम् –

(१) अपराजितपृच्छा

(२) क्षीरार्णवशिल्पम्

(३) जयपृच्छा

(४) वास्तुशास्त्रम्

(५) विश्वकर्ममतम्

(६) अपराजितप्रभा वा विश्वकर्मसंहिता

(७) आयतत्त्वम्

(८) ज्ञानरत्नकोष

(९) वास्तुप्रकाश:

(१०) वास्तुविधि:

(११) वास्तुशास्त्रम्

(१२) वास्तुसङ्ग्रह:

[1] वास्तुशास्त्रम्, भा.१,हिन्दू साइन्स् ऑफ आर्किटेक्चर,पृ–८३

(१३) वास्तुसमुच्चयः

(१४) विश्वकर्मीय (शिल्पम्)।[१]

डॉ. हरिकृष्णशास्त्री महोदयः उपर्युक्तग्रन्थानामतिरिक्तमन्य रचनानां सूची ददाति स्म। तेषां प्रमुख रचना निम्नदर्शितरुपेण वर्तते –

(१) दीपार्णवः – विश्वकर्माचार्यः

(२) अपराजितवास्तुशास्त्रम् – भुवनदेवाचार्यः

(३) वास्तुमण्डनम् –सूत्रधारमण्डनः[२]

(४) वास्तुमञजरी– सूत्रधारनाथाः

(५) बृहद्विमानशास्त्रम् – स्वामिब्रह्ममुनिः

(६) वास्तुचन्द्रिका – कृपारामः

(७) पिण्डप्रभाकरः – सुधाकरद्विवेदी।

वास्तुशास्त्रीयग्रन्थानामन्तर्गतमुपरोक्त ग्रन्थानामतिरिक्तमन्यग्रन्थानां सूचीः अपि प्राप्यते। अतः स्पष्टं भवति यत् प्राचीन भारतीय जनाः विभिन्नानि अङ्गोपाङ्गानि प्रत्येकाङ्गानि सहितेन भवनादीनां रचना–कौशलेन सुपरिचिताः आसन्। एतेषां ग्रन्थानां नामावलिः अधोदर्शितरूपेण प्रदर्श्य –

(१) अशुमत्कल्पः

(२) आगारविनोदः

---

[1] वास्तुशास्त्रम्, भा.१, हिन्दू साइन्स ऑफ आर्किटेक्चर, पृ–८३

[2] संस्कृतवाङ्मय, भा.२,पृ–२८

(३) आयादिलक्षणम्

(४) आरामादिप्रतिष्ठापद्धतिः

(५) कौतुकलक्षणम्

(६) गृहनिरुपणम्

(७) गृहनिर्माणविधिः

(८) गृहपीठिका

(९) गृहरत्नभूषणम्

(१०) गृहवास्तुप्रदीपः

(११) गोपुरविधानादिलक्षणम्

(१२) ग्रामनिर्णयः

(१३) चित्रकर्मशिल्पशास्त्रम्

(१४) चित्रसूत्रम्

(१५) दिग्साधनम्

(१६) दीर्धविस्तारप्रकारः

(१७) देवताशिल्पम्

(१८) देवालयलक्षणम्

(१९) द्वारलक्षणपटलम्

(२०) पिण्डप्रभाकरः

(२१) पीठलक्षणम्

(२२) प्रतिमाद्यप्यादिवचनम्

(२३) प्रतिमामानलक्षणम्

( २४ ) प्रतिष्ठातन्त्रम्

( २५ ) प्रतिष्ठातत्त्वम्

( २६ ) प्रासादकल्पः

( २७ ) प्रासादकीर्तनम्

( २८ ) प्रासाददीपिका

( २९ ) प्रासादलक्षणम्

( ३० ) प्रासादलङ्कारलक्षणम्

( ३१ ) बिम्बमानम्

( ३२ ) बुद्धप्रतिमालक्षणम्

( ३३ ) बृहद्वास्तुपद्धतिः

( ३४ ) मठप्रतिष्ठातत्त्वम्

( ३५ ) मञ्जुश्रीमूलकल्पः

( ३६ ) मानकथनम्

( ३७ ) मानवास्तयलक्षणम्

( ३८ ) मूर्तिलक्षणम्

( ३९ ) मूलस्तम्भनिर्णयः

( ४० ) राजगृहनिर्माणम्

( ४१ ) वास्तुचक्रम्

( ४२ ) वास्तुतत्त्वम्

( ४३ ) वास्तुनिर्णयः

( ४४ ) वास्तुपुरुषलक्षणम्

(४५) वास्तुप्रदीपः

(४६) वास्तुप्रबन्धः

(४७) वास्तुप्रतिष्ठासङ्ग्रहः

(४८) वास्तुयोगतत्त्वम्

(४९) वास्तुरत्नप्रदीपः

(५०) वास्तुरत्नाकरः

(५१) वास्तुलक्षणम्

(५२) वास्तुविचारः

(५३) वास्तुशिरोमणिः

(५४) वास्तुसंख्या

(५५) वास्तुसर्वस्वम्

(५६) वास्तुसारणी

(५७) वास्तुसारसर्वस्वसङ्ग्रहः

(५८) विमानलक्षणम्

(५९) विश्वविद्याऽभरणम्

(६०) व्यवहारसारः

(६१) व्यवहारसारस्वतम्

(६२) शील्पकलादीपिका

(६३) शिल्पदीपिका

(६४) शिल्पनिघण्टुः

(६५) शिल्पशास्त्रम्

(६६) शिल्पशास्त्रसारसङ्ग्रहः

(६७) शिल्पसर्वस्वसङ्ग्रहः

(६८) शिल्पसारः

(६९) षड्विदिकसन्धानम्

(७०) सर्वविहारीयतन्त्रम्

(७१) सङ्ग्रहशिरोमणिः

(७२) संहितासारावली

(७३) सम्यक्सम्बुद्धभाषितम्

(७४) सारस्वतशिल्पशास्त्रम्।[१]

---

[1] संस्कृतवाङ्मय, भा.२, पृ–२८–२९